questions'.[77] Though Nālandā was a Buddhist University, it did not confine itself to Buddhist doctrines but taught Brahmanical texts as well as practical sciences. From the account of I-tsing, who visited India sometime later and stayed at Nālandā for ten years, grammar seems to have been regarded as the foundation of all other sciences and a student had to study thoroughly Panini's grammar with its supplementary books and commentary before he could get admission to the University.[78] The subjects that were taught at Nālandā included the theological works of all the sects of Buddhism, the Vedas, logic, grammar, medicine, systems of Indian philosophy such as Nyāya, Sāṃkhya, Yoga &c.[79] According to I-tsing Valabhī in Western India was another great centre of learning. Besides these there were others in the form of Buddhist monasteries and *Gurukulas* or Brahmaincal seats of learning in cities and forests. We have a graphic description in the *Harshacharita* of the intellectual activities in the hermitage of Divākaramitra and also of those in Bāṇa's native place Prītikūṭa on the S'oṇa which was called *Brāhmaṇādhivāsa* from its predominantly Brahmin population. In the latter place the Vedas were studied and taught, the sciences of grammar and Mimāṃsā were expounded and debated and poetical discussions leading to the composition of the *subhāshitas* were indulged in.[80] The mention of a *Bhāshākavi* and a *Prākritakavi* among the companions of Bāṇa shows that Prākrit dialects and the spoken languages of the time were also cultivated.

In the age of Bāṇa Buddhism was still flourishing while

77 Beal Vol. II p. 170.

78 Keay – *Ancient Indian Education* p. 98.

79 I-tsing pp. 176 foll.

80 See Bāṇa's inquiries after returning home –
यथाकालमधीयते वा बटवः। अतिदितमविच्छिन्नो वा वेदाभ्यासः। कच्चित्स एव चिरन्तनो यज्ञविद्याकर्मण्यभियोगः, तान्येव व्याकरणे परस्परस्पर्धानुबन्धबन्ध्यदिवसदर्शितादराणि व्याख्यानमण्डलानि, सैव वा पुरातनी परित्यक्तान्यकर्तव्या प्रमाणगोष्ठी स एव वा मन्दीकृतेतरशास्त्ररसो मीमांसायामतिरसः। कच्चित्त एवाभिनवसुभाषितसुधावर्षिणः काव्यालापाः। ह. च. p. 84.

Brāhmanism was gradually asserting itself. The kings of the time, whatever might be their personal faith, extended equal support to both. We have seen this in the case of Harsha. The kings of Valabhī, though devotees of the Hindu gods Maheśvara and Āditya, donated villages for the worship of the images of the Buddha as well as for the clothing, food and medicine of the Bhikshus aud the repairs of the monasteries.[81] Bhāskaravarman of Assam was a patron of Hinduism but he welcomed Yuan Chwang with great cordiality. In Buddhism the Mahāyāna form was spreading while the Hīnayāna was decreasing. In Hinduism S'iva had probably more devotees than any other deity. In the south the Kāpālikas who worshipped the terrible aspect of S'iva or Durgā seem to be more numerous.[82] Jainism was patronised by the Chālukya kings of Badāmī. Ravikirti, who composed the Aihole inscription in praise of Harsha's rival Pulakeśin II, was a follower of Jainism.[83] The seventh century of the Christian Era was thus a period of intense intellectual and religious activity in the history of India.

---

81 See Valabhī Copperplate Inscription of Dharasena II, *Ind. Ant.* Vol. VI. p. 9.

82 See the मत्तविलासप्रहसन of महेन्द्रविक्रमवर्मन् a Pallava king and contemporary of Harsha.

83 See the Aihole Inscription of Pulakes'in, *Ep. Ind.* Vol. VI. p. 1.

हर्षचरितसारः ।

प्रथम उच्छ्वासः ।

नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे ।
त्रैलोक्यनगरारम्भमूलस्तम्भाय शम्भवे ॥ १ ॥
सकलमहीभृत्कम्पकृदुत्पद्यत एक एव नृपवंशे ।
विपुलेऽपि पृथुप्रतिमो दन्त इव गणाधिपस्य मुखे ॥ २ ॥

नमस्तस्मै गणेशाय सर्वविघ्नोपशान्तये ।
यत्कृपावशतः सम्यगुल्लसन्ति सतां धियः ॥ १ ॥
नमाम्यहं ततो देवीं करवीरनिवासिनीम् ।
ब्रह्मादयः सुरा नित्यं यत्कृपास्पृहयालवः ॥ २ ॥
मातापित्रोर्गुरोश्चापि प्रणम्य चरणाम्बुजे ।
संक्षिप्तं हर्षचरितमत्र व्याख्यायते मया ॥ ३ ॥
क्व दुरूहार्थगम्भीरा बाणोक्तिः क्व च मेऽल्पधीः ।
शङ्केऽहं साहसादस्माद्भविष्याम्युपहास्यताम् ॥ ४ ॥
तथापि विदुषामत्र प्राप्तहस्तावलम्बनः ।
विषमस्यापि मार्गस्य पारं गन्तास्मि पङ्गुवत् ॥ ५ ॥

अथ ' मङ्गलादीनि काव्यानि प्रथन्ते ' इत्यभियुक्तोक्तिं स्मरन् माङ्गल्यार्थं कविः श्रीबाणभट्टः शिवं स्तौति **नम इति** । तुङ्गं उन्नतं शिरो मूर्धानं चुम्बति स्पृशतीति तादृशश्चन्द्र एव चामरं चमरपुच्छकृतव्यजनं तेन चारवे रमणीयाय । त्रयाणां लोकानां समाहारस्त्रिलोकी । सैव त्रैलोक्यं चतुर्वर्णादित्वात्स्वार्थे ष्यञ् । तदेव नानाभङ्गिशोभितत्वान्नगरं तदारम्भे मूलस्तम्भायाद्यस्थाणवे शम्भवे शंकराय नमः । 'नमः स्वस्ति-' इत्यादिना चतुर्थी, भगवांश्चन्द्रार्धचूडामणिस्त्रैलोक्यस्योत्पत्तिहेतुरिति भावः । अनुप्रासो रूपकं चालंकारौ ।

सकलेति । विपुलेऽपि विशालेऽपि नृपवंशे सकलानां महीभृतां राज्ञां, दन्तपक्षे पर्वतानां च । कम्पं वेपथुं, पक्षे चलनं च करोतीति (कृ+क्विप् ' क्विप् च ' । ' ह्रस्वस्य पिति कृति तुक् ' इति तुक् ।) पृथुप्रतिमः पृथुसदृशः । पृथुनाम्ना राज्ञा हि सर्वे शैलाः प्रकम्प्योत्सारिता इति विष्णुपुराणे । एक एव, अद्वितीय इत्यर्थः । विपुलेऽपि गजाननस्य मुखे

अस्ति पुण्यकृतामधिवासो वासवावास इव वसुधामवतीर्णः **श्रीकण्ठो** नाम जनपदः । तत्र च नानारामाभिरामकुसुमगन्धपरिमलसुभगो ज्वलन्मखशिखिसहस्रदीप्यमानदशदिगन्तः, सुधारससिक्तधवलगृहपङ्क्तिपाण्डुरः प्रतिनिधिरिव चन्द्रलोकस्य, **स्थाण्वीश्वराख्यो** जनपदविशेषः । तत्र च साक्षात्सहस्राक्ष इव सर्ववर्णधरं धनुर्दधानः सर्वादिराजतेजःपुञ्जनिर्मित इव राजा **पुष्पभूति**रिति नाम्ना बभूव ।

तस्मात्**पुष्पभूते**र्निर्गते राजवंशे क्रमेणोदपादि **हूण**हरिणकेसरी **सिन्धुराज**ज्वरो **गुर्जर**प्रजागरो **गान्धाराधिप**गन्धद्विपकूटपाकलो **लाट**पाटवपाटच्चरो **मालव**लक्ष्मीलतापरशुः **प्रतापशील** इति प्रथितापरनामा **प्रभाकरवर्धनो** नाम राजाधिराजः । तस्य च जन्मान्तरेऽपि सती पार्वतीव शंकरस्य, **यशोवती** नाम महादेवी प्राणानां प्रणयस्य विस्रम्भस्य धर्मस्य सुखस्य च भूमिरभूत् ।

सकलशैलकम्पकारकः पृथ्वी महती प्रतिमा आकृतिर्यस्य तादृशो दन्तो रद इवोत्पद्यते । अनेन प्रकृतोच्छ्वासे चक्रवर्तिनोऽनन्यसाधारणस्य श्रीहर्षवर्धनस्य जन्म वर्ण्येतेति सूच्यते । उपमालंकारः ।

अस्तीति । पुण्यकृतां धार्मिकाणां, पक्षे देवानाम् । अधिवासो वसतिः । वसुधां क्षितिमवतीर्ण आगतो वासवस्येन्द्रस्य आवासः स्वर्ग इवेत्युत्प्रेक्षा । जनपदः जनाः पद्यन्ते गच्छन्ति यत्रेति देशः । नाना विविधा आरामा उपवनानि रामाश्च स्त्रियः । अभिरामो रमणीयः । ज्वलतां मखशिखिनां यागाग्नीनां सहस्रैर्दीप्यमाना उज्ज्वला दश दिशामन्ता यस्मिन् । सुधारस इष्टकाचूर्णलेपः पक्षे अमृतद्रवः, सुधा लेपोऽमृतं स्नुहीत्यमरः । पाण्डुरो धवलः । प्रतिनिधिः प्रतिमा सर्वान् ब्राह्मणादीन् वर्णान् धारयति पालयति इति तादृशम् । सहस्राक्षपक्षे शुक्लादिरूपं दधानम् । आदिराजाः प्रथमकालीना राजानः पृथ्वादयः । **तस्मादिति** । उदपादि उदपद्यत (उत् + पद् + चिण्) । हूणा एव हरिणा मृगास्तेषां केसरी सिंहः । सिंहो हरिणानिव यो हूणान् लीलया व्यापादयदित्यर्थः । परम्परितरूपकम् । सिंधुराजस्य ज्वरो रोगभेदः । ज्वरवत् तमपीडयदित्यर्थः । प्रजागरो निद्राक्षयः । 'यस्य गन्धं समाघ्राय न तिष्ठन्ति प्रतिद्विपाः । स वै गन्धगजो नाम नृपतेर्विजयावहः ।' कूटपाकलः हस्तिवातज्वरः । लाटानां देशविशेषनिवासिनां (रणे) पाटवस्य कौशलस्य पाटच्चरः पाटयंश्चरतीति चोरः (पृषोदरादिः) । तन्निवासिजनानां निर्जेतेत्यर्थः । प्रथितं प्रख्यातं अपरं नाम नामधेयं यस्य । अन्यज्जन्म जन्मान्तरम् (मयूरव्यंसकादित्वात्साधुः) । सती दक्षकन्या जन्मान्तरे पार्वतीरूपेण शंकरस्य पत्नी बभूव, एवं सती साध्वी यशोवत्यपि शं सुखं करोतीति तादृशस्य राज्ञो जन्मान्तरेऽपि

निसर्गत एव च स नृपतिरादित्यभक्तो बभूव। प्रतिदिनमुदये दिनकृतः स्नातः सितदुकूलधारी धवलकर्पटप्रावृतशिराः प्राङ्मुखः क्षितौ जानुभ्यां स्थित्वा कुङ्कुमपङ्कानुलिप्ते मण्डलके पवित्रपद्मरागपात्रीनिहितेन स्वहृदयेनेव सूर्यानुरक्तेन रक्तकमलषण्डेनार्चां ददौ। अजपच्च जप्यं सुचरितः प्रत्युषसि मध्यंदिने दिनान्ते चापत्यहेतोः प्राध्वं प्रयतेन मनसा जञ्जपूको मन्त्रमादित्यहृदयम्।

भक्तजनानुरोधविधेयानि तु भवन्ति देवतानां मनांसि। यतः स राजा कदाचिद् ग्रीष्मसमये यदृच्छया सितकरकरसितसुधाधवलस्य हर्म्यस्य पृष्ठे सुष्वाप। पार्श्वे चास्य द्वितीयशयने देवी **यशोवती** शिश्ये। परिणतप्रायायां तु श्यामायाम्, आसन्नप्रभातवेलाविलुप्यमानलावण्ये लिलम्बिषमाणे सीदत्तेजसि तारकेश्वरे, देवी **यशोवती** सहसैव 'आर्यपुत्र, परित्रायस्व, परित्रायस्व' इति भाषमाणा भूषणरवेण व्याहरन्तीव परिजनमुत्कम्पमानाङ्गयष्टिरुदतिष्ठत्।

मार्यासीत्। प्रणयस्य प्रेम्णः। विस्रम्भस्य विश्वासस्य। भूमिः स्थानम्, प्रभवश्च। **निसर्गत इति**। निसर्गतः स्वभावतः। दिने दिने प्रतिदिनम्। दिनं दिवसं करोतीति तस्य सूर्यस्य। सितं शुभ्रं दुकूलं क्षौमाम्बरं धारयतीति। कर्पटो वस्त्रम्। अयं शब्दः प्रायो जीर्णवस्त्रे मलिनवस्त्रे वा प्रयुज्यते, परं अत्र वस्त्रसामान्ये प्रयुक्तः। कुङ्कुमं काश्मीरदेशजं गन्धद्रव्यम्। मण्डलके गोलके। पवित्राणां पद्मरागाणां रक्तवर्णानां मणिविशेषाणां पात्र्यां भाजने निहितेन। सूर्येण बालातपेन अनुरक्तेन रक्तवर्णेन, हृदयपक्षे सूर्ये अनुरक्तेन भक्तिपूर्णेन। रक्तकमलानां षण्डेन समूहेन। अर्चां ददौ पूजां विदधौ। प्रत्युषसि प्रभाते। प्राध्वं सविनयम्। 'प्राध्वं तु प्रणते चातिदूरे वर्त्मनि बन्धने'। प्रयतेन विशुद्धेन। जञ्जपूको भृशं जपितुं शीलं यस्य सः। 'यजजपदशां यङः' इति सूत्रेण यङन्ताज्जपधातोस्ताच्छील्ये ऊकप्रत्ययः। आदित्यः हृदयं रहस्यं यस्य तं मन्त्रम्। **भक्तजनेति**। अनुरोधः इष्टसम्पादनेच्छा। तद्विधेयानि तदायत्तानि। सिता धवलाः कराः किरणा यस्य तस्य, चन्द्रमसः करा रश्मयस्तद्वत् सिता श्वेता सुधा लेपविशेषस्तेन धवलस्य। हर्म्यस्य सौधस्य पृष्ठे तले। प्रायेण परिणतायां परिणतप्रायायाम् (मयूरव्यंसकादित्वात्साधुः)। श्यामायां रात्रौ। लम्बितुं अस्तं गन्तुं इच्छति लिलम्बिषमाणे। लम्बधातोः सन्नन्तात् शानच्। 'आने मुक्' इति मुगागमः। सीदत् अल्पीभवत् तेजः कान्तिर्यस्य तस्मिन् तारकेश्वरे चन्द्रमसि। व्याहरन्तीव आह्वयन्तीव। उत्प्रेक्षालंकारः।

अथ तेन सर्वस्यामपि पृथिव्यामश्रुतपूर्वेण किमुत देवीमुखे परित्रायस्वेति ध्वनिना दग्ध इव श्रवणयोरेकपद एव निद्रां तत्याज राजा । शिरोभागाच्च कोपकम्पमानदक्षिणकराकृष्टेनाच्छधारेण धौतासिना सीमन्तयन्निव निशां सत्वरावतारितवामचरणाक्रान्तिकम्पितप्रासादो निद्रया कोपेन चातिलोहिताभ्यां लोचनाभ्यां पाटलयन् पर्यन्तानाशानाम्, 'देवि न भेतव्यं न भेतव्यम्' इत्यभिदधानो वेगेनोत्पपात । सर्वासु च दिक्षु विक्षिप्तचक्षुर्यदा नाद्राक्षीत्किंचिदपि तदा पप्रच्छ तां भयकारणम् ।

अथ शान्ते हृदयोत्कम्पकारिणि साध्वसे सा समभाषत । 'आर्यपुत्र जानामि स्वप्ने भगवतः सवितुर्मण्डलान्निर्गत्य द्वौ कुमारकौ तेजोमयौ बालातपेनेव पूरयन्तौ दिग्भागान्, मुकुटिनौ, कुण्डलिनौ, अङ्गदिनौ, कवचिनौ, गृहीतशस्त्रौ कन्ययैकया चानुगम्यमानौ, क्षितितलमवतीर्णौ । तौ च मे विलपन्त्याः शस्त्रेणोदरं विदार्य प्रवेष्टुमारब्धौ । प्रतिबुद्धास्मि चार्यपुत्र विक्रोशयन्ती वेपमानहृदया' इति ।

नरपतिस्तु तच्छ्रुत्वा प्रीयमाणेनान्तःकरणेन तामवादीत् । 'देवि मुदोऽवसरे विषीदसि । समृद्धास्ते गुरुजनाशिषः । पूर्णा नो मनोरथाः । परिगृहीतासि कुलदेवताभिः । प्रसन्नस्ते भगवानंशुमाली न चिरेणैवातिगुणवदपत्यत्रयलाभेनानन्दयिष्यति भवतीम्' इति । अवतीर्य च यथाक्रियमाणाः क्रियाश्चकार । यशोवत्यपि तुतोष तेन पत्युर्भाषितेन ।

अथेति । पूर्वमश्रुतेन अश्रुतपूर्वेण । भूतपूर्वे चरडिति ज्ञापकात् पूर्वशब्दस्य परनिपातः । एकपदे एव सहसैव । अच्छा विमला धारा निशिताग्रो यस्य तेन धौतासिनोज्ज्वलखड्गेन सीमन्तः केशविभागः । तद्वतीं कुर्वन् सीमन्तयन् द्विधा कुर्वन् । 'प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्च' इति वार्तिकेन 'सीमन्तवत्' शब्दात् णिच् मतुब्लोपश्च । सत्वरं झटिति अवतारितस्य भूमौ स्थापितस्य वामचरणस्य सव्यपादस्याक्रान्त्या निक्षेपेण कम्पितश्चालितः प्रासादो येन सः । आशानां दिशां पर्यन्तानन्तभागान् पाटलयन् रञ्जयन् । पाटलशब्दात् 'तत्करोति तदाचष्टे' इति णिजन्तात् शतृप्रत्ययः । **अथ शान्त इति** । उत्कम्पो वेपथुः । साध्वसे भये । बालातपेन प्रभातकालीनै रक्तकिरणैः । कुण्डलिनौ कर्णभूषणवन्तौ । अङ्गदिनौ केयूरवन्तौ । 'मे विलपन्त्याः' इत्यनादरे षष्ठी । प्रवेष्टुमारब्धौ 'गत्यर्थाकर्मक–' इति सूत्रेण कर्तरि क्तः । **नरपतिरिति** । मुदः आनन्दस्य, अवसरे समये । विषीदसि दुःखाकुला भवसि । समृद्धाः सफलाः । परिगृहीता स्वीकृता । नचिरेण अचिरात् (सुप्सुपेति समासः) ।

ततः समतिक्रान्ते कस्मिंश्चित्कालांशे देव्यां **यशोवत्यां** देवो **राज्यवर्धनः** प्रथममेव संबभूव गर्भे। गर्भस्थितस्यैव च यस्य यशसेव पाण्डुतामादत्त जननी गुणगौरवक्लान्तेव गात्रमुद्वोढुं न शशाक। शनैः शनैरुपचीयमानगर्भभरालसा च गुरुभिर्वारितापि वन्दनाय कथमपि सखीभिर्हस्तावलम्बेनानीयत। समादेष्टुमप्यसमर्थासीद्गृहकार्याणि कैव कथा कर्तुम्। अङ्गान्यपि नाशक्नोद्धारयितुं दूरे भूषणानि। अवतीर्णे च दशमे मास्यसूत देवं **राज्यवर्धनम्**। यस्मिञ्जाते जातप्रमोदा नृत्यमय्य इवाजायन्त प्रजाः। मासमेकं दिवसमिव महोत्सवमकरोन्नरपतिः।

अथान्यस्मिन्नतिक्रान्ते कस्मिंश्चित्काले देव्या यशोवत्या हृदये गर्भे च सममेव संबभूव **हर्षः**। शनैः शनैश्चास्या भूयोऽप्यापाण्डुतामङ्गयष्टिर्जगाम। क्रीडायामपि नासहताज्ञाभंगम्। अपि च चतुर्णामपि महार्णवानामेकीकृतेनाम्भसा स्नातुं वाञ्छा बभूव। गुरुप्रणामेष्वपि स्तम्भितमिव शिरः कथमपि ननाम। ततश्च प्राप्ते ज्येष्ठामूलीये मासि बहुलासु बहुलपक्षद्वादश्यां व्यतीते प्रदोषसमये समारुरुक्षति क्षपायौवने सहसैवान्तःपुरे समुदपादि कोलाहलः स्त्रीजनस्य। निर्गत्य च ससंभ्रमं **यशोवत्याः** स्वयमेव हृदयनिर्विशेषा धात्र्याः सुता **सुयात्रेति** नाम्ना राज्ञः पादयोर्निपत्य 'देव दिष्ट्या वर्धसे द्वितीयसुतजन्मना' इति व्याहरन्ती पूर्णपात्रं जहार।

अंशूनां किरणानां मालास्यास्तीति सूर्यः। **तत इति**। यशसेव कीर्त्येव पाण्डुतामादत्त पाण्डुरवर्णा बभूव। यशसो धवलत्वं कविसम्प्रदायसिद्धम्। गुणानां शौर्यविनयादीनां गौरवेण गुरुत्वेन क्लान्तेव श्रान्तेव। दूरे किं पुनः। जातप्रमोदा हृष्टाः। मासमेकं 'कालाध्वनोरत्यन्तसंयोगे द्वितीया'। **अथेति**। यशोवत्या हृदये मनसि हर्ष आनन्दो गर्भे च हर्षस्तन्नामा चक्रवर्ती नृपः सममेव युगपदेव संबभूव संजातः। गर्भधारणेनातीव प्रमुदिता बभूवेति भावः। आज्ञाभंगम् शासनाकरणं नासहत नामर्षयत्। इदं गर्भवर्तिनो हर्षवर्धनस्यातिमानित्वसूचकम्। ज्येष्ठामूलीये ज्यैष्ठे। ज्येष्ठा च मूलं च ज्येष्ठामूले। 'द्वन्द्वाच्छः' इतिसूत्रेण तन्नक्षत्रद्वययुक्तकाले छप्रत्ययः। बहुलासु कृत्तिकासु 'बहुलाः कृत्तिका गावो बहुलोऽग्नौ शितौ त्रिषु' इत्यमरः। बहुलपक्षस्य कृष्णपक्षस्य द्वादश्यां तिथौ। प्रदोषसमये निशारम्भे। हृदयान्निर्गतो विशेषो भेदो यस्याः। स्वहृदयवत्प्रियतमेत्यर्थः। दिष्ट्या भाग्येन। पूर्णपात्रं पुत्रजननादिहर्षकाले यदाकृष्य गृह्यते वस्त्रादिकं तत्। उक्तं च 'आनन्ददो हि सौहार्दादेत्य वस्त्रादिकं बलात्। अजानतो हरत्येव पूर्णपात्रं तु तत्स्मृतम्॥' इति

अस्मिन्नेव च काले राज्ञः परमसंमतः सर्वासां ग्रहसंहितानां पारदृश्वा सकलगणकमध्ये महितो हितश्च त्रिकालज्ञानभाक् **तारको** नाम गणकः समुपसृत्य विज्ञापितवान् । 'देव श्रूयताम् । **मान्धाता** किलैवंविधे व्यतीपातादिसर्वदोषाभिषङ्गरहिते सर्वेषूच्चस्थानस्थितेष्वेवं ग्रहेष्वीदृशि लग्ने भेजे जन्म । अर्वाक् ततोऽस्मिन्नन्तराले पुनरेवंविधे योगे चक्रवर्तिजनने नाजनि जगति कश्चिदपरः । सप्तानां चक्रवर्तिनामग्रणीश्चक्रवर्तिचिह्नानां महारत्नानां च भाजनं सप्तानां सागराणां पालयिता, सप्ततन्तूनां सर्वेषां प्रवर्तयिता सप्तसप्तिसमः सुतोऽयं देवस्य जातः' इति ।

अत्रान्तरे स्वयमेवानाध्माता अपि तारमधुरं शङ्खा विरेसुः । अनाहतान्यपि मङ्गलतूर्याणि रेणुः । यज्वनां मन्दिरेषु प्रदक्षिणशिखाकलापकथितकल्याणागमाः प्रजज्वलुरनिन्धना वैतानवह्नयः । प्रावर्तत च प्रनृत्तसकलकटकलोकः पुत्रजन्मोत्सवो महान् ।

अस्मिन्नेवेति। परमसंमतोऽतीव पूज्यः 'मतिबुद्धिपूजार्थेभ्यश्च' इति वर्तमाने क्तः । 'क्तस्य च वर्तमाने' इति सूत्रेण 'राज्ञः' इति कर्तरि षष्ठी । ग्रहसंहितानां ज्योतिःशास्त्राणां पारदृश्वा पारं दृष्टवान् अशेषज्ञ इत्यर्थः । 'दृशेः क्वनिप्' इति भूतार्थे क्वनिप् । गणयन्तीति गणका दैवज्ञाः । महितो मान्यः । त्र्यवयवः कालः त्रिकालः तस्य ज्ञानं भजते इति (क्विन्) । मान्धाता सूर्यवंशीयश्चक्रवर्ती नृपः । व्योम्नि चन्द्रार्कौ राशिषट्के यदैकमार्गस्थितौ भवतः स व्यतीपातः । उक्तं च लाटाचार्येण–'गगने हि हिमकरार्कौ युगपत्स्यातां यदैकमार्गस्थौ । भगणार्धेऽर्कश्च यदा शशी स भवेद्व्यतीपातः ॥' स आदिर्येषां तेषां सर्वदोषाणामभिषङ्गेण संपर्केण रहिते । 'अजवृषभमृगाङ्गनाकुलीरा झषवणिजौ च दिवाकरादितुङ्गाः ।' इति बृहज्जातके निर्दिष्टान्युच्चस्थानानि । ईदृशि लग्ने जन्मकाले राश्युदये, राशीनामुदयो लग्नमित्यमरः । अर्वाक् पश्चात् । ततः—'अन्यारादितरर्तेदिक्शब्दाञ्चूत्तर–' इति सूत्रेण विहितपञ्चम्यर्थे तसिः । 'भरतार्जुनमांधातृभगीरथयुधिष्ठिराः । सगरो नहुषश्चैव सप्तैते चक्रवर्तिनः ।' चक्रं राष्ट्रं वर्तयन्तीति । कूर्मोर्णो जालहस्तित्वं पद्मादिजालचरणत्वमीत्यादि चक्रवर्तिचिन्हानि । महारत्नानि मण्यश्वकरिचक्राणि वरा स्त्री परिनायकः । षडेतानि तु रत्नानि कीर्तितानि मनीषिभिः ।' इति संकेते । लवणेक्षुसुरासर्पिर्दधिदुग्धजलैः पूर्णाः सप्त सागराः । सप्ताभिर्भूरादिभिर्महाव्याहृतिभिस्तन्यते इति सप्ततन्तुर्यज्ञः । सप्त सप्तयोऽश्वा यस्य स सूर्यः ।

अत्रान्तर इति। अनाध्माता मुखानिलेनापूरिताः । विरेसुः सस्वनुः (वि + रस् + लिट्) । अनाहतानि अताडितानि । मङ्गलतूर्याणि मङ्गलवाद्यानि । यज्वनां यागिनाम् । प्रगतो दक्षिणं प्रदक्षिणः शिखाकलापो ज्वालासमूहस्तेन कथितः सूचितः कल्याणस्य

वृत्ते च तस्मिन् महोत्सवे शनैः शनैः पुनरप्यतिक्रामति काले देवे चोत्तमाङ्गनिहितरक्षासर्षपे मुग्धस्मितैः कुसुमैरिव मधुकरकुलानि बन्धुहृदयान्याकर्षति धात्रीकराङ्गुलिलग्ने पञ्चषाणि पदानि प्रयच्छति **हर्षे**, षष्ठं वर्षमवतरति च **राज्यवर्धने** देवी यशोवती गर्भेणाधत्त देवीं **राज्यश्रियम्**।

पूर्णेषु च प्रसवदिवसेषु दीर्घरक्तनालनेत्रां हंसमधुरस्वरां कुसुमसुकुमारावयवां सकलजननयनानन्दकारिणीं प्रसूतवती दुहितरम्।

अस्मिन्नेव तु काले देव्या **यशोवत्या** भ्राता सुतमष्टवर्षदेशीयमुद्धूयमानकुटिलकाकपक्षकशिखण्डं **भण्डि**नामानमनुचरं समर्पितवान्। अवनिपतेस्तु तस्योपरि पुत्रयोस्तुल्यं दर्शनमासीत्। राजपुत्रावपि सकलजीवलोकहृदयानन्ददायिनौ तेन प्रकृतिदक्षिणेन मधुमाधवाविव मलयमारुतेनोपेतौ नितरां रेजतुः। क्रमेण चापरेणेव च भ्रात्रा प्रजानन्देन सह वर्धमानौ यौवनमवतेरतुः। स्थिरोरुस्तम्भौ च पृथुप्रकोष्ठौ दीर्घभुजार्गलौ विकटोरःकवाटौ प्रांशुसालाभिरामौ बभूवतुः।

एकदा च तावाहूय भुक्तवानभ्यन्तरगतः पिता सस्नेहमवादीत्। 'वत्सौ प्रथमं राज्याङ्गं दुर्लभाः सद्भृत्याः। अतः सर्वदोषाभिषङ्गैरसङ्गतौ बहु-

---

भाग्यस्य आगमः प्राप्तिर्यैस्ते। अनिन्धना दाह्यकाष्ठरहिताः। वितानस्य यज्ञस्येमे वैतानवह्नयो यागाग्नयः। कटकं राजधानी। **वृत्त इति**। वृत्ते समाप्ते। उत्तमाङ्गे शिरसि निहिताः स्थापिता रक्षार्थं सर्षपाः सस्यविशेषा यस्य तस्मिन्। मुग्धस्मितैः अकृत्रिमैरीषद्हास्यैः। पञ्च वा षड् वा पञ्चषाणि। 'बहुव्रीहौ संख्येये डजबहुगणात्' इति डच्। **पूर्णेष्विति**। दीर्घे आयते रक्ते ताम्रे च नालवत् मृणालवत् नेत्रे यस्याः। हंसस्येव विहंगभेदस्येव मधुरो मनोहरः स्वरो यस्यास्ताम्। **अस्मिन्नेवेति**। अष्टवर्षदेशीयं ईषन्न्यूनाष्टवर्षम्। 'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः।' इति देशीयर्। उद्धूयमाना वायुनेतस्ततः प्रेर्यमाणाः कुटिला वक्राः काकपक्षा मस्तकपार्श्वद्वयस्थाः केशरचनाभेदाः शिखण्डश्चूडा च यस्य। पुत्रयोस्तुल्यं सुतनिर्विशेषं 'तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्' इति सूत्रेण षष्ठी। प्रकृत्या स्वभावेन पक्षे निसर्गतश्च, दक्षिणेन छन्दानुवर्तिना सरलेन वा पक्षे दाक्षिणात्येन च 'दक्षिणो दक्षिणोद्भूतसरलच्छन्दवर्तिषु' इति मेदिनी। मधुमाधवौ चैत्रवैशाखौ। प्रजानन्देन सह वर्धमानौ- प्रतिदिनं वर्धमानौ तौ पश्यतां जनानामानन्दोऽपि वृद्धिं प्रापेत्यर्थः। यूनो भावो यौवनं तारुण्यम्। अवतेरतुः प्रापतुः। स्थिरौ दृढौ ऊरू स्तम्भौ इव ययोस्तौ। पृथू विशालौ प्रकोष्ठौ मणिबन्धपर्यन्तं कूर्पराधोभागौ ययोस्तौ। प्रांशू उन्नतौ सालौ वृक्षविशेषाविवाभिरामौ मनोहरौ। **एकदेति**। 'स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च। राज्या

धोपधाभिः परीक्षितौ शुची विनीतौ विक्रान्तावभिरूपौ **मालवराजपुत्रौ** भ्रातरौ भुजाविव मे शरीरादव्यतिरिक्तौ **कुमारगुप्तमाधवगुप्ता**वस्माभिर्भवतोरनुचरत्वार्थमिमौ निर्दिष्टौ । अनयोरुपरि भवद्भ्यामपि नान्यपरिजनसमवृत्तिभ्यां भवितव्यम्' इत्युक्त्वा तयोराह्वानाय प्रतीहारमादिदेश ।

तौ च प्रविश्य दूरादेव चतुर्भिरङ्गैरुत्तमाङ्गेन च गां स्पृशन्तौ नमश्चक्रतुः । स्निग्धनरेन्द्रदृष्टिनिर्दिष्टामुचितां भूमिं भेजाते । मुहूर्तं च स्थित्वा भूपतिरादिदेश तौ–'अद्यप्रभृति भवद्भ्यां कुमारावनुवर्तनीयौ' इति । 'यथाज्ञापयति देवः' इति भेदिनीदोलायमानमौलिभ्यामुत्थाय **राज्यवर्धनहर्षौ** प्रणेमतुः । तौ च पितरम् । ततश्चारभ्य क्षणमपि चक्षुर्गोचरादनपयान्तौ सततपार्श्ववर्तिनौ कुमारयोस्तौ बभूवतुः ।

अथ **राज्यश्रीरपि** नृत्यगीतादिषु सकलासु कलासु प्रतिदिवसमुपचीयमानपरिचया शनैः शनैरवर्धत। परिमितैरेव दिवसैर्यौवनमारुरोह । निपेतुरेकस्यां तस्यां शरा इव लक्ष्यभुवि भूभुजां सर्वेषां दृष्टयः । दूतप्रेषणादिभिश्च तां ययाचिरे राजानः ।

कदाचित्तु राजान्तःपुरप्रासादस्थितः पार्श्वस्थितां महादेवीमुत्सारितपरिजनो जगाद–देवि तरुणीभूता वत्सा **राज्यश्रीः** । एतदीया गुणवत्तेव क्षणमपि हृदयान्नापयाति मे चिन्ता । यौवनारम्भ एव च कन्यकानामिन्धनीभवन्ति पितरः सन्तापानलस्य । को हि नाम सहते विरहमपत्यानाम् । यथा

ङ्गानि' इत्यमरः । एतेषु प्रथमं प्रधानभूतम् । असङ्गतौ रहितौ । 'धर्मार्थकाममोक्षैश्च प्रत्येकं परिशोधने । उपेत्य धीयते यस्मादुपधा तेन कीर्तिता ।' इत्युपधाः परीक्षणोपायाः। शुची शुद्धाचरणौ । विक्रान्तौ प्रबलौ । अभिरूपौ पण्डितौ । शरीरादव्यतिरिक्तौ अपृथग्भूतौ । अन्यपरिजनैरितरसेवकैः समा तुल्या वृत्तिर्वर्तनं ययोस्ताभ्याम् । **ताविति**। चतुर्भिरङ्गैर्जानुभ्यां हस्ताभ्यां च । गां भूमिम् । स्निग्धेन सस्नेहेन नरेन्द्रेण नृपतिना दृष्ट्या निर्दिष्टां प्रदर्शिताम् । अनुवर्तनीयौ सेवितव्यौ । मेदिन्यां भूमौ दोलायमानाभ्यां दोलनयन्त्रवच्चञ्चलाभ्यां मौलिभ्यां शिरोभ्याम् । दोलाशब्दात् 'कर्तुः क्यङ् सलोपश्च' इति क्यङि शानच् । चक्षुर्गोचरात् नयनविषयात् अनपयान्तौ अगच्छन्तौ । **अथेति** । उपचीयमानो वर्धमानः परिचयो ज्ञानं यस्याः सा । परिमितैः अल्पैः दिवसैः 'अपवर्गे तृतीया'। लक्ष्यभुवि शरव्ये शरा बाणा इव । **कदाचिदिति** । उत्सारिता अपसारिताः परिजनाः सेवका येन सः । तरुणीभूता यौवनमारूढा (तरुण+च्वि+भू+क्त) । गुणवत्ता गुणित्वम् ।

यथा समापतन्ति दूता वराणां वराकी लज्जमानेव चिन्ता तथा तथा नितरां प्रविशति मे हृदयम् । किं क्रियते । तथापि गृहगतैरनुगन्तव्या एव लोकवृत्तयः । प्रायेण च सत्स्वप्यन्येषु वरगुणेष्वभिजनमेवानुरुध्यन्ते धीमन्तः । धरणीधराणां च मूर्ध्नि स्थितो माहेश्वरः पादन्यास इव सकलभुवननमस्कृतो **मौखरिवंशः** । तत्रापि तिलकभूतस्या**वन्तिवर्मणः** सूनुरग्रजो **ग्रहवर्मा** नाम ग्रहपतिरिव गां गतः पितुरन्यूनो गुणैरेनां प्रार्थयते । यदि भवत्या अपि मतिरनुमन्यते ततस्तस्मै दातुमिच्छामि' इत्युक्तवति भर्तरि दुहितृस्नेहकातरहृदया साश्रुलोचना महादेवी प्रत्युवाच—'आर्यपुत्र, संवर्धनमात्रोपयोगिन्यो धात्रीनिर्विशेषा भवन्ति खलु मातरः कन्यकानाम् । दाने तु प्रमाणमासां पितरः । केवलं कृपाकृतविशेषः सुदूरेण तनयस्नेहादतिरिच्यते दुहितृस्नेहः । यथा नेयं यावज्जीवमावयोरार्तितां प्रतिपद्यते तथार्यपुत्र एव जानाति ' इति ।

राजा तु जातनिश्चयो दुहितृदानं प्रति समाहूय सुतावपि विदितार्थावकार्षीत् । शोभने च दिवसे **ग्रहवर्मणा** कन्यां प्रार्थयितुं प्रेषितस्य पूर्वागतस्यैव प्रधानदूतपुरुषस्य करे सर्वराजकुलसमक्षं दुहितृदानजलमपातयत् ।

जातमुदि कृतार्थे च गते तस्मिन्, आसन्नेषु विवाहदिवसेषु अविधवामय इव भवति राजकुले, मङ्गलमय इव जायमाने जीवलोके, चारणमयेष्विव लक्ष्यमाणेषु दिङ्मुखेषु, बान्धवमय इव दृश्यमाने सर्गे, गण्यमान इव जनाङ्गुलीभिः, आलोक्यमान इव मार्गध्वजैः, प्रत्युद्गम्यमान इव मङ्गल्यवाद्यप्रतिशब्दकैः, आहूयमान इव मौहूर्तिकैः, आकृष्यमाण इव मनोरथैराजगाम विवाहदिवसः ।

अथ प्रतीहारः प्रविश्य नृपसमीपम् 'देव जामातुरन्तिकात्ताम्बूल-

सन्तापो मनस्ताप एवानलो वह्निस्तस्य इन्धनीभवन्ति तेन दह्यन्ते इत्यर्थः । समापतन्ति उपसर्पन्ति । गृहगतैः गृहस्थैः । लोकवृत्तयः कन्यादानादयो लोकव्यवहाराः । अभिजनं कुलम् । धरणीधराणां पार्थिवानां मूर्ध्नि स्थितोऽग्रेसरः पक्षे पर्वतानां श्रेष्ठे हिमालये निहितः । गां गतः पृथिवीमवतीर्णो ग्रहपतिश्चन्द्र इव । दुहितरि सुतायां स्नेहेन प्रेम्णा कातरं भीतं हृदयं यस्यास्ताम् । कृपयाऽनुकम्पया कृतो विशेषः प्रभेदो यस्य सः । आर्तितां न प्रतिपद्येत मनःसंतापं न ददाति । **जातमुदीति**—जातमुदि आनन्दिते । कृतार्थे कृतकृत्ये । चारणमयेषु बन्दिप्रचुरेषु । 'तत्प्रकृतवचने मयट्' इति प्राचुर्यार्थे मयट् । मुहूर्तं विदन्तीति मौहूर्तिकाः ज्योतिर्विदः । 'क्रतूक्थादि'—इति ठक् । **अथेति** । स्वाकारं शोभनाकृतिम् । यामिन्या रात्रेः ।

दायकः **पारिजातक**नामा संप्राप्तः' इत्यभिधाय स्वाकारं युवानमदर्शयत् । राजा तु दूरादेव जामातृबहुमानाद्दर्शितादरः 'बालक, कच्चित्कुशली **ग्रहवर्मा**' इति पप्रच्छ । असौ तु समाकर्णितनराधिपध्वनिः कतिचित्पदान्युपसृत्य चिरं वसुंधरायां निधाय मूर्धानमुत्थाय 'देव, कुशली यथाज्ञापयस्यर्चयति च देवं नमस्कारेण' इति व्यज्ञापयत् । आगतजामातृनिवेदनागतं च तं ज्ञात्वा कृतसत्कारं राजा 'यामिन्याः प्रथमे यामे विवाहकालात्ययकृतो यथा न भवति दोषः' इति संदिश्य प्रतीपं प्राहिणोत् ।

अथ सकलकमलवनलक्ष्मीं वधूमुख इव सञ्चार्य समवसिते वासरे, कपोतकण्ठकर्बुरे वरयात्रागमनरजसीव कलुषयति दिङ्मुखानि तिमिरे, विवाहमङ्गलकलश इवोदयशिखरिणा समुत्क्षिप्यमाणे वर्धमानधवलच्छाये ताराधिपमण्डले आजगाम मुहुर्मुहुरुल्लासितस्फारस्फुरितारुणचामरैः पुरो धावमानैः पादातैरुत्कर्णकटकहयप्रतिहेषितदीयमानस्वागतैरिव वाजिनां वृन्दैश्चापूरितदिग्भागः, नक्षत्रमालामण्डितमुखीं करिणीमारूढः, गन्धतैलावसेकसुगन्धिना दीपिकाचक्रवालस्यालोकेन कुङ्कुमपटवासधूलिपटलेनेव पिञ्जरीकुर्वन् सकलं लोकं नववधूवदनावलोकनकुतूहलेनेव कृष्यमाणहृदयो **ग्रहवर्मा** ।

राजा तु तमुपद्वारमागतं चरणाभ्यामेव राजचक्रानुगम्यमानः ससुतः प्रत्युज्जगाम । अवतीर्णं च तं कृतनमस्कारं प्रसारितभुजो गाढमालिलिङ्ग

यामे प्रहरे । विवाहकालः परिणयसमयस्तस्यात्ययोऽपगमः, तेन कृतः तन्निमित्तक इत्यर्थः । यथा न भवति दोषः 'तथागन्तव्य'मिति शेषः । प्रतीपं ग्रहवर्माणं प्रति 'द्व्यन्तरुपसर्गेभ्योऽप ईत् ।' **अथ सकलेति** । विवाहसमयस्यासन्नत्वाद्वधूमुखं प्रफुल्लं बभूव । कविस्तु तत्र अस्तं गच्छता भगवता सूर्येण तत्र सञ्चारिता कमलवनलक्ष्मीरेव हेतुरित्युत्प्रेक्षते । कपोतस्य पारावतस्य कण्ठो ग्रीवा तद्वत् कर्बुरे शबले तिमिरेऽन्धकारे । कलुषयति मलिनीकुर्वति । वर्धमाना उपचीयमाना धवला श्वेता छाया कान्तिर्यस्य संध्यारागरहितत्वात् । पक्षे वर्धमानेन शरावेण धवलच्छायम् । ताराधिपश्चन्द्रः । मुहुर्मुहुः पुनः पुनः । उल्लासितैः ऊर्ध्वं प्रेरितैः, स्फारं महत् स्फुरितं चलनं येषां तैः, अरुणैः रक्तवर्णैश्च चामरैश्चमरीबालव्यजनैः । प्रतिहेषितं अश्वशब्दस्य प्रतिध्वनिः । वाजिनां वृन्दैरश्वसमूहैः । नक्षत्रमाला—नक्षत्राणामिव माला, सप्तविंशतिमौक्तिकैर्निर्मितो हारभेदः । दीपिकानां चक्रवालस्य समूहस्य आलोकेन प्रकाशेन । कुंकुमस्य काश्मीरजस्य पटवासस्य पिष्टातकस्य च धूलिपटलेन रजःसमूहेन पिञ्जरीकुर्वन् पीतरक्तवर्णं कुर्वन् । **राजेति** । परिष्वक्तौ आलिङ्गितौ राज्यवर्धनो हर्षश्च

यथाक्रमं परिष्वक्त**राज्यवर्धनहर्षं** च हस्ते गृहीत्वाभ्यन्तरं निन्ये। स्वानिर्विशेषासंनदानादिना चैनमुपचचार।

न चिराच्च **गम्भीर**नामा नृपतेः प्रणयी विद्वान् द्विजन्मा ग्रहवर्माणमुवाच– 'तात त्वां प्राप्य चिरात्खलु **राज्यश्रिया** घटितौ तेजोमयौ **सोमसूर्यवंशा**विव **पुष्पभूतिमुखर**वंशौ।' एवं वदत्येव तस्मिन्नुपसृत्य मौहूर्तिकाः 'देव समासीदति लग्नवेला। व्रजतु जामाता कौतुकगृहम्' इत्यूचुः। अथ नरेन्द्रेण 'उत्तिष्ठ, गच्छ' इति गदितो **ग्रहवर्मा** प्रविश्यान्तःपुरं जामातृदर्शनकुतूहलिनीनां स्त्रीणां पतितानि लोचनसहस्राणि विकचनीलकुवलयवनानीव लङ्घयन्नाससाद कौतुकगृहद्वारम्। निवारितपरिजनश्च प्रविवेश।

तत्र च कौतुकगृहे परिहासस्मेरमुखीभिर्नारीभिर्यद्यत्कार्यते जामाता तत्तत्सर्वमतिपेशलं चकार। कृतपरिणयानुरूपवेशपरिग्रहां गृहीत्वा करे वधूं निर्जगाम। जगाम च नवसुधाधवलां निमन्त्रितागतैर्भूभृद्भिः परिवृतां सेकसुकुमारयवाङ्कुरदन्तुरैः पञ्चास्यैः कलशैरुद्भासितपर्यन्तामुपकृशानुनिहितानुपहतहरितकुशां वेदीम्। आरुरोह च तां दिवमिव सज्योत्स्नः शशी। समुत्ससर्प च वेल्लितारुणशिखापल्लवस्य शिखिनः समीपम्। हुते च हुतभुजि दक्षिणावर्तप्रवृत्ताभिर्वधूवदनविलोकनकुतूहलिनीभिरिव ज्वालाभिरेव सह प्रदक्षिणं बभ्राम। पात्यमाने च लाजाञ्जलौ नखमयूखधवलिततनुरदृष्टपूर्ववधूवररूपविस्मयस्मेर इवादृश्यत विभावसुः।

परिसमापितवैवाहिकक्रियाकलापो जामाता वध्वा समं प्रणनाम श्वशुरौ।

येन तम्। उपचचार उपतस्थे। **न चिराच्चेति**। घटितौ संयोजितौ। कौतुकगृहं मंगलगृहम्। 'पारम्पर्योपदेशेन प्रख्याते मङ्गले किल। कौतूहले च शब्दज्ञाः कौतुकं संप्रचक्षते' इति शाश्वतः। स्त्रीणां पतितानि लोचनसहस्राणि ताभिः सहस्रशः प्रेरितान् कटाक्षान्। विकचानां प्रफुल्लानां नीलकुवलयानां नीलकमलानां वनानि समूहानिव लङ्घयन्नतिक्रामन्। **तत्रेति**। परिहासेन नर्मणा स्मेरं स्मितपूर्णं मुखं यस्यास्ताम् 'नमिकम्पिस्म्यजस–'इति रः। अतिपेशलम् अतीव सुन्दरम्। सेकेन उदकाभिषेकेण सुकुमाराः कोमला यवस्य धान्यविशेषस्याङ्कुराः तैर्दन्तुरैर्नतोन्नतैः; पञ्चास्यैः पञ्चमुखैः कलशैर्घटैः उद्भासित उज्ज्वलीकृतः पर्यन्तः प्रान्तभागो यस्यास्ताम्। कृशानोः समीपमुपकृशानु, सामीप्यार्थेऽव्ययीभावः। ज्योत्स्नाया कौमुद्या सहितः सज्योत्स्नः 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वः। दक्षिणावर्तेन प्रदक्षिणं प्रवृत्ताभिश्चलिताभिः। नखमयूखा नखकिरणाः। **परिसमापितेति**।

श्वशुरकुले च शीलेनामृतमिव श्वश्रूहृदये वर्षन्नभिनवाभिनवोपचारैरपुनरुक्तान्यानन्दमयानि दश दिनानि स्थित्वा यौतकनिवेदितानीव शम्बलान्यादाय हृदयानि सर्वलोकस्य कथं कथमपि विसर्जितो नृपेण वध्वा सह स्वदेशमगमदिति।

इति हर्षचरितसारे चक्रवर्तिजन्मवर्णनं नाम प्रथम उच्छ्वासः।

परिसमापितो निःशेषितो वैवाहिकीनां विवाहसम्बन्धिनीनां क्रियाणां कलापः समूहो येन सः। उपचाराः सन्तोषोपायाः। अपुनरुक्तानि नित्यं नवीनानि। युतयोर्वधूवरयोरिदं यौतकं विवाहकाले दत्तं धनम्। तत्र निवेदितान्यर्पितानि। शम्बलानि पाथेयानि।

इति हर्षचरितसारस्य बालमनोरमाख्यायां व्याख्यायां प्रथमोच्छ्वासः।

द्वितीय उच्छ्वासः ।

पातयति महापुरुषान् सममेव बहूननादरेणैव ।
परिवर्तमान एकः कालः शैलानिवानन्तः ॥

अथ कदाचिद्राजा **राज्यवर्धनं** कवचहरमाहूय **हूणान्** हन्तुं हरिणानिव हरिर्हरिणेशकिशोरमपरिमितबलानुयातं चिरन्तनैरमात्यैरनुरक्तैश्च महासामन्तैः कृत्वा साभिसर**मुत्तरापथं** प्राहिणोत् ।

प्रयान्तं च तं देवो **हर्षः** कतिचित्प्रयाणकानि तुरङ्गमैरनुवव्राज । प्रविष्टे च कैलासप्रभाभासिनीं ककुभं भ्रातरि, वर्तमानो नवे वयसि विक्रमरसानुरोधिनि केसरिशरभशार्दूलवराहबहुलेषु तुषारशैलोपकण्ठेषु क्रीडन् मृगयां मृगलोचनः कतिपयान्यहानि बहिरेव व्यलम्बत । चकार चाकर्णान्ताकृष्टकार्मुकनिर्गतभासुरभल्लवर्षी स्वल्पीयोभिरेव दिवसैर्निःश्वापदान्यरण्यानि ।

एकदा तु वासतेय्यास्तुरीये यामे प्रत्युषस्येव स्वप्ने चटुलज्वालापुञ्जपि-

---

पातयतीति – एकः असहायः परिवर्तमानोऽन्यथाभावं गतः अनन्तः अन्तरहितः कालः अनादरेणैव तुच्छतयैव बहून् महापुरुषान् एकः परिवर्तमानः स्वमूर्धानं चालयन् अनन्तः शेषः बहून् शैलान् पर्वतानिव सममेव युगपदेव पातयति नाशयति भूमिसात् करोति च । अनेनास्मिन्नुच्छ्वासे वर्णिता राज्ञस्तन्महिष्याश्च विपत्तिः सूचिता ।

अथेति–कवचहरं कवचधारणार्हवयस्कम् । 'वयसि च' इति हरतेः अच् प्रत्ययः । यथा हरिः सिंहः हरिणेशकिशोरं मृगेन्द्रपोतम् हरिणान् मृगान् हन्तुं प्रहिणोति तथेत्यर्थः । चिरंतनैः वृद्धैः । साभिसरं ससहायं कृत्वा । उत्तरापथं उत्तरस्यां दिशि स्थापितं हूणराज्यं प्रतीत्यर्थः । **प्रयान्तमिति** । प्रयाणकानि सैन्यनिवेशनानि । कैलासस्य हिमाद्रिशिखरस्य प्रभया कान्त्या भासते इति तादृशीं उत्तरामिति यावत् । ककुभं दिशं प्रविष्टे गते भ्रातरि राज्यवर्धने । यस्य च भावेन भावलक्षणमिति सप्तमी । विक्रमरसं पराक्रमानुरागमनुरुणद्धीति तादृशे पराक्रमासक्ते इत्यर्थः । नवे वयसि यौवने । केसरिणः सिंहाः । शरभा अष्टपादाः प्राणिविशेषाः । शार्दूला व्याघ्राः । बहिरेव संग्रामभूमेर्बहिः । कर्णान्तं मर्यादीकृत्य आकर्णान्तं आकृष्टं यत् कार्मुकं धनुस्ततो निर्गतान् भासुरानुज्ज्वलान् भल्लान् बाणान् वर्षति किरतीति तादृशः । स्वल्पीयोभिः अत्यल्पैर्दिवसैः–' अपवर्गे तृतीया । निःश्वापदानि वन्यपशुरहितानि । **एकदेति** । वसतिः वसनं तत्र साधुर्वासतेयी रात्रिः 'पथ्यतिथिवसतिस्वपतेर्ढञ्'

ज्ञरीकृतसकलककुभा दुर्निवारेण दवहुतभुजा दह्यमानं केसरिणमद्राक्षीत्। तस्मिन्नेव च दावदहने समुत्सृज्य शावकानुत्प्लुत्य चात्मानं पातयन्तीं सिंहीमपश्यत्। आसीच्चास्य चेतसि– 'लोके हि लोहेभ्यः कठिनतराः खलु स्नेहमया बन्धनपाशाः, यदाकृष्टास्तिर्यञ्चोऽप्येवमाचरन्ति' इति। प्रबुद्धस्य चास्य मुहुर्मुहुर्दक्षिणेतरमक्षि पस्पन्द। गात्रेषु चाकस्मादेव वेपथुर्विपप्रथे। निर्निमित्तमेवान्तर्बन्धनस्थानाच्चचालेव हृदयम्। अह्नि च तस्मिन् शून्येनैव च चेतसा चिक्रीड मृगयाम्। आरोहति च हरितहये मध्यमह्नो भवनमागत्योभयतो मन्दमन्दं संवाह्यमानतनुतालवृन्तः क्षितितलवितताममतिशिशिरमलयजरसलवलुलितवपुषमिन्दुधवलोपधानधारिणीं वेत्रपट्टिकामधिशयानः साशङ्क एव तस्थौ।

अथ दूरादेव लेखगर्भया नीलीरागमेचकरुचा चैलचीरिकया रचितमुण्डमालकम्, श्रमातपाभ्यामारोप्यमाणकायकालिमानम्, अन्तर्गतेन शोकशिखिनाङ्गारतामिव नीयमानम्, अतित्वरागमनद्रुततरपदोद्धूयमानधूलिराजिव्याजेन राजवार्ताश्रवणकुतूहलिन्या मेदिन्येवानुगम्यमानम्, अनिमित्तभूतदीर्घाध्वगं **कुरङ्गक**नामानमायान्तमद्राक्षीत्।

दृष्ट्वा च पूर्वानिमित्तपरम्पराविर्भावितभीतिरभिद्यत हृदयेन। कुरङ्गकस्तु कृतप्रणामः समुपसृत्य प्रथममाननलग्नं विषादमुपनिन्ये पश्चाल्लेखम्। तं च

'टिड्ढाणञ्' इत्यादिसूत्रेण ङीप्। तुरीये चतुर्थे यामे प्रहरे। चटुलानां चञ्चलानां ज्वालानामर्चिशिखानां पुञ्जेन कलापेन पिञ्जरीकृताः श्वेतरक्तीकृताः सकलाः ककुभो दिशो येन तेन। दवहुतभुजा दावानलेन। तिर्यञ्चः पशवः। दक्षिणेतरं वामम्। वामाक्षिस्पन्दनमशुभसूचकम्। वेपथुः प्रकम्पः। निर्निमित्तमकारणम्। हरिता हया अश्वा यस्य तस्मिन् सूर्ये। संवाह्यमानं संचाल्यमानं तनु लघ्वाकारं तालवृन्तं व्यजनं यस्य सः। अतिशिशिरस्य अत्यन्तं शीतलस्य मलयजरसस्य चन्दनरसस्य लवेन लेशेन लुलितं विलिप्तं वपुः पृष्ठभागो यस्यास्ताम्। उपधीयते शिरोऽत्रेति उपधानं उपबर्हः। वेत्रपट्टिकामिति 'अधिशीङ्स्थासां कर्म' इति कर्म। आशङ्कया भयेन सहितः साशङ्कः।

अथेति। लेखः राजज्वरविषयकं पत्रं गर्भे यस्यास्तया। नीलीरागेण मेचका नीलवर्णा रुक् कान्तिर्यस्यास्तया। रचिता मुण्डमाला मालाकारं शिरोवेष्टनं यया। शोकशिखिना शोकाग्निना। अतित्वरया अतिवेगेन गमने द्रुततराभ्यां प्रजवाभ्यां पदाभ्यां उद्धूयमाना उत्क्षिप्यमाणा या धूले रजसो राजिः पंक्तिः तद्व्याजेन तदपदेशेन। अनिमित्तं दुःशकुनः भूतः अनिमित्तभूतः (सुप्सुपूसमासः)। **दृष्ट्वेति**–प्रथममाननलग्नं मुखे दृश्यमानं विषादं

Govt. Public Library

देवो हर्षः स्वयमेवादायावाचयत् । लेखार्थेनैव च समं गृहीत्वा हृदयेन संतापमभ्यधात्—'**कुरङ्गक,** किं मान्द्यं तातस्य' इति । स चक्षुषा बाष्पजलबिन्दुभिर्मुखेन च खञ्जाक्षरैः क्षरद्भिर्युगपदाचचक्षे— 'देव दाहज्वरो महान्' इति । तच्चाकर्ण्य सहसा सहस्रधेवास्य हृदयं पफाल । कृताचमनश्च जनयितुरायुष्कामोऽपरिमितमणिकनकरजतजातमात्मपरिबर्हमशेषं ब्राह्मणसादकरोत् । अभुक्त एवोच्चचाल । 'दापय वाजिनः पर्याणम्' इति पुरःस्थितं बभाण युवानम् । वेपमानहृदयश्च ससंभ्रमप्रधावितपरिवर्धकोपनीतमारुह्य तुरङ्गममेकाक्येव प्रावर्तत । अकाण्डप्रयाणसंज्ञाशङ्खक्षुभितं तु संभ्रमात्सज्जीभूतमुद्धूतमुखरखुररवभरितसकलभुवनविवरमागत्यागत्य सर्वाभ्यो दिग्भ्यो धावमानमश्वीयमढौकत ।

उपलब्धनरेन्द्रमान्द्यवार्ताविषण्ण इव नष्टतेजस्यधोमुखीभवति भगवति भानुमति **भण्डिप्रमुखेन** प्रणयिना राजपुत्रलोकेन बहुशो विज्ञाप्यमानोऽपि नाहारमकरोत् । पुरःप्रवृत्तप्रतीहारगृह्यमाणग्रामीणपरम्पराप्रकटितप्रगुणवर्त्मा च वहन्नेव निन्ये निशाम् ।

अन्यस्मिन्नहनि मध्यन्दिने विगतजयशब्दम्, अस्तमिततूर्यनादमुपसंहृतगीतम्, उत्सारितोत्सवं स्कन्धावारं समाससाद । प्रविशन्नेव च विपणिवर्त्मनि कुतूहलाकुलबहलबालकपरिवृतमूर्ध्वयष्टिविष्कम्भवितते वामहस्तवर्तिनि

खेदमुपनिन्ये— तं दृष्ट्वा हर्षो लेखपठनात्पूर्वमेव विषादकारणं जज्ञौ इत्यर्थः । लेखार्थेन समं संतापं मनस्तापं हृदयेन गृहीत्वाऽनुभूय— लेखपठनसमकालमेव तद्हृदयं संतापपूर्णमभवदित्यर्थः । खञ्जाक्षरैः अस्पष्टाक्षरैः । पफाल विदीर्णं बभूव । जनयितुः पितुः आयुष्कामो जीवितेच्छुः आत्मपरिबर्हं स्वभोगोपकरणानि भोजनपात्रादीनि । ब्राह्मणसात् ब्राह्मणाधीनं देयम् । 'देये त्रा च' इति चकारात् सातिप्रत्ययः । पर्याणं पल्ययनम् । परिवर्धकोऽश्वपालः । अकाण्डे अनवसरे प्रयाणस्य संज्ञा सूचकः शंखस्तेन क्षुभितं संचालितम् । मुखराः शब्दायमानाः । अश्वीयं अश्वसमूहः 'केशाश्वाभ्यां यञ्छावन्यतरस्याम्' इति समूहार्थे छप्रत्ययः । अढौकत गत्यर्थस्य ढौकृधातोर्लङि रूपम् । **उपलब्धेति** । मान्द्यं रुग्णता । प्रणयिना सस्नेहेन । पुरः प्रवृत्तैरग्रे प्रचालितैः प्रतीहारैः सेवकैर्गृह्यमाणानां ग्रामीणानां ग्रामनिवासिनां जनानां परम्पराभिः पंक्तिभिः प्रकटितं प्रदर्शितं प्रगुणं सरलं वर्त्म मार्गो यस्य सः । 'प्राञ्जलः प्रगुणोऽजिह्मः' इति त्रिकाण्डशेषे । **अन्यस्मिन्निति** । विगताः अपगता जयशब्दा यस्मात् तं स्कन्धावारम् राजधानीम् । समाससाद प्राप (सम् + आ + सद् + लिट्) । विपणेः पण्यवीथिकाया वर्त्मनि मार्गे । ऊर्ध्वयष्टेस्तुङ्गदण्डस्य

भीषणमहिषाधिरूढप्रेतनाथसनाथे चित्रवति पटे परलोकव्यतिकरमितरकरकलितेन शरकाण्डेन कथयन्तं यमपट्टिकं ददर्श । तेनैव च गीयमानं श्लोकमशृणोत् ।

मातापितृसहस्राणि पुत्रदारशतानि च ।
युगे युगे व्यतीतानि कस्य ते कस्य वा भवान् ॥

तेन चाधिकतरमवदीर्यमाणहृदयः क्रमेण राजद्वारं प्रतिषिद्धसकललोकप्रवेशं ययौ । तुरगादवतीर्णश्चाभ्यन्तरान्निष्क्रामन्तमप्रसन्नमुखरागं **सुषेण**नामानं वैद्यकुमारमद्राक्षीत् । कृतनमस्कारं चाप्राक्षीत्– 'सुषेण, अस्ति तातस्य विशेषो न वा' इति । सोऽब्रवीत्– 'नास्तीदानीं यदि भवेत् कुमारं दृष्ट्वा' इति । मन्दं मन्दं द्वारपालैः प्रणम्यमानश्च राजकुलं विवेश ।

अविरलबाष्पपयःपरिप्लुतलोचनेन पितृपरिजनेन वीक्ष्यमाणो विविधौषधिद्रव्यद्रवगन्धगर्भमुत्क्वथतां काथानां सर्पिषां तैलानां च पच्यमानानां गन्धमाजिघ्रन्नवाप तृतीयं कक्ष्यान्तरम् ।

तत्र चातिनिःशब्दे पिहितपक्षद्वारके परिहृतकवाटरटिते घटितगवाक्षरक्षितमरुति निभृतसंज्ञानिर्दिश्यमानसकलकर्माणि प्रविष्टकतिपयप्रणयिनि गम्भीरज्वरारम्भभीतभिषजि, दुर्मनायमानमन्त्रिणि, भेषजसामग्रीसम्पादनव्यग्रसमग्रव्यवहारिणि, मुहुर्मुहुराहूयमानतोयकर्मान्तिकानुमितघोरातुरतृषि, संचितप्रचुरप्राचीनामलकमातुलुङ्गद्राक्षादाडिमादिफले धवलगृहे स्थितम्, जिह्वाग्रे जीवितेशस्य वर्तमानम्, विरलं वाचि, चलितं चेतसि, विह्वलं वपुषि, क्षीणमायुषि

विष्कम्भे आधारे वितते प्रसारिते । भीषणं भयावहं महिषमधिरूढेन प्रेतनाथेन यमेन सनाथे सहिते । व्यतिकरं वृत्तान्तम् । शरकाण्डेन वेतसदण्डेन । यमपट्टेन जीवतीति यमपट्टिकः 'वेतनादिभ्यो जीवति' इति सूत्रेण ठक् । व्यतीतानि परेतानी । अप्रसन्नः खिन्नो मुखरागो मुखच्छाया यस्य । मन्दं मन्दं जडपदैरित्यर्थः । राजकुलं प्रासादम् । **अविरलेति** । अविरलं सन्ततं बाष्पपयसाश्रुभिः परिप्लुते पूर्णे लोचने यस्य तेन । काथानां ओषधिपाकानाम् । कक्ष्याया अपवरकस्यान्तरं मध्यभागम् । **तत्रेति** । पिहितानि घटितानि पक्षद्वाराणि पक्षकाणि यस्य तस्मिन् धवलगृहे । परिहृतं अपहृतं कवाटानां रटितं द्वारफलकानां शब्दो यस्मिन् । घटितैः पिहितैः गवाक्षैः वातायनैः रक्षितो मरुत् वायुर्यस्मिन् । निभृताभिः निःशब्दाभिः संज्ञाभिः निर्दिश्यमानानि प्रदर्श्यमानानि सकलकर्माणि यस्मिन् । भेषजस्य औषधस्य सामग्र्याः संपादने सज्जीकरणे व्यग्रा व्यासक्ता समग्राः सकला व्यवहारिणो

प्रचुरं प्रलापे, संततं श्वसिते, पार्श्वोपविष्टयानवरतरोदनोच्छूननयनया गृहीतचामरिकयापि निश्वसितैरेव वीजयन्त्या विविधौषधिधूलिधूसरितशरीरया मुहुर्मुहुः 'आर्यपुत्र, स्वपिषि' इति व्याहरन्त्या देव्या यशोवत्या शिरसि वक्षसि च स्पृश्यमानं पितरमद्राक्षीत्।

दृष्ट्वा च प्रथमदुःखसंपातमथ्यमानमतिराशङ्कित इव भागधेयेभ्यः समभवत्। अन्तकपुरवर्तिनमेव च पितरमन्यत। पावकमयमिव हृदयमुद्वहन्नाविन्दत कर्तव्यम्। पस्पर्श च हृदयेन भियमुत्तमाङ्गेन च गाम्।

अवनिपतिस्तु दूरादेव दृष्ट्वातिदयितं तनयं तदवस्थोऽपि निर्भरस्नेहावर्जितः प्रधावमानो मनसा प्रसार्य भुजौ 'एह्येहि' इत्याह्वयञ्शरीरार्धेन शयनादुदगात्। ससंभ्रममुपसृतं चैनं विनयावनम्रमुन्नमय्य बलादुरसि निवेश्य विशन्निव प्रेम्णा निशाकरमण्डलमध्यम्, मज्जन्निवामृतमये महासरसि, पीडयन्नङ्गैरङ्गानि, कपोलेन कपोलमवघट्टयन्, निमीलयन्पक्ष्माग्रग्रथिताजस्रास्रविस्राविणी विलोचने, विस्मृतज्वरसंज्वरः सुचिरमालिलिङ्ग। कथं कथमपि चिराद्विमुक्तमुपसृत्य कृतनमस्कारं प्रणतजननीकमुपागतमासीनं च शयनान्तिके पिबन्निव विगतनिमेषनिश्चलेन चक्षुषा व्यलोकयत्। पस्पर्श च पुनः पुनर्वेपथुमता पाणितलेन क्षयक्षामकण्ठश्च कृच्छ्रादिवावादीत्— 'वत्स कृशोऽसि' इति। **भण्डिस्त्वकथयत्**— 'देव, तृतीयमहः कृताहारस्यास्याद्य' इति।

तच्छ्रुत्वा बाष्पवेगगृह्यमाणाक्षरं कथं कथमप्यायतं निःश्वस्योवाच— वत्स जानामि त्वां पितृप्रियमतिमृदुहृदयम्। ईदृशेषु विधुरयति धीमतोऽपि

वणिजो यस्मिन्। जीवितेशस्य यमस्य जिह्वाग्रे वर्तमानं कवलीभवन्तम्। अनवरतं सततं रोदनं आक्रन्दनं तेन उच्छूने स्फीते नयने यस्यास्तया। निःश्वसितैर्निःश्वासैः। **दृष्ट्वेति**। प्रथमेन दुःखसंपातेन दुःखाभिषङ्गेन मथ्यमाना पीड्यमाना मतिर्बुद्धिर्यस्य सः। आशङ्कितो भीतः। अन्तिकपुरवर्तिनं परलोकगतमित्यर्थः। **अवनिपतिरिति**। निर्भरस्नेहेन नितान्तप्रेम्णा। आवर्जितः आकृष्टः। उदगात् उदगच्छत् 'इणो गा लुङि' इति गादेशः। उन्नमय्य उत्थाप्य 'ल्यपि लघुपूर्वात्' इति णेरयादेशः। अवघट्टयन् संघर्षयन्। पक्ष्मणां नेत्रलोम्नामग्रे ग्रथितमेकीभूतं अजस्रं सन्ततं अस्रं अश्रुजलं तत् विस्रावयतः इति। प्रणता नमस्कृता जननी येन। 'नद्यृतश्च' इति कप्। वेपथुमता सकम्पेन। क्षयेण शक्तिह्रासेन क्षामः क्षीणः कण्ठः स्वरो यस्य सः। कृताहारस्य भुक्तवतः। **तच्छ्रुत्वेति**। बाष्पवेगेन प्रजवाश्रुपातेन गृह्यमाणानि अस्पष्टानि अक्षराणि वर्णा यथा स्यात् तथा। आयतं दीर्घम्। विधुरां अ-

धियमतिदुर्धरो बान्धवस्नेहः सर्वप्रमाथी। अतो नार्हस्यात्मानं शुचे दातुम्। उद्दामदाहज्वरदग्धोऽपि दह्ये खल्वहमधिकतरमनेनायुष्मदाधिना। निशितमिव शस्त्रं तक्ष्णोति मां त्वदीयस्तनिमा। सुखं च राज्यं च वंशश्च प्राणाश्च त्वयि मे स्थिताः। यथा मम तथा सर्वासां प्रजानाम्। फलमस्यनेकजन्मान्तरोपार्जितस्याकलुषस्य कर्मणः। करतलगतमिव कथयन्ति चतुर्णामप्यर्णवानामाधिपत्यं ते लक्षणानि। त्वज्जन्मनैव कृतार्थोऽस्मि। निरभिलाषोऽस्मि जीवितव्ये। भिषगनुरोधः पाययति मामौषधम्। अपि च सर्वप्रजापुण्यैः सकलभुवनतलपरिपालनार्थमुत्पत्स्यमानानां भवादृशां जन्मग्रहणोपायः पितरौ। प्रजाभिस्तु बन्धुमन्तो राजानः, न ज्ञातिभिः। तदुत्तिष्ठ। कुरु पुनरेव सर्वाः क्रियाः। कृताहारे च त्वय्यहमपि स्वयमुपयोक्ष्ये पथ्यम्' इत्येवमभिहितस्य चास्य धक्ष्यन्निव हृदयमतितरां शोकानलः संदुधुक्षे। क्षणमात्रं च स्थित्वा पुनराहारार्थमादिश्यमानो धवलगृहादवततार। चकार च चेतसि– 'अकाण्डे खल्वयं समुपस्थितो महाप्रलयो व्यभ्र इव वज्रपातः। किमत्र करवाणि' इति।

राजपुरुषेणाधिष्ठितश्च गत्वा स्वधाम कतिचित्कवलानग्रहीत्। आचमंश्च चामरग्राहिणमादिदेश– 'विज्ञायागच्छ कथमास्ते तातः' इति। गत्वा च प्रतिनिवृत्य च 'देव तथैव' इति विज्ञापितस्तेनागृहीतताम्बूल एवोत्ताम्यता मनसास्ताभिलाषिणि सवितरि सर्वानाहूयोपह्वरे 'वैद्याः किमस्मिन्नेवंविधे विधेयमधुना' इति विषण्णहृदयः पप्रच्छ। ते तु व्यज्ञापयन्– 'देव, धैर्य-

---

शरणां करोति विधुरयति पीडयति 'तत्करोति तदाचष्टे' इति वार्तिकेन विधुरशब्दाण्णिच्। सर्वं प्रमथते इति सर्वप्रमाथी सर्वपीडकः। 'मथे विलोडने' इति धातोः 'सुप्यजातौ—'इति सूत्रेण णिनिः। शुचे शोकाय दातुं दुःखपरवशं कर्तुम्। आयुष्मतस्तव आधिना मनस्तापेन। अकलुषस्य अमलिनस्य धर्म्यस्य। भिषजां वैद्यानामनुरोधो निर्बन्धो मामौषधमगदं पाययति, पाधातोर्णिचि 'आतो युक्चिण्कृतोः' इति युक्। 'गतिबुद्धिप्रत्यवसानार्थ–'इति सूत्रेण अणिकर्तुः कर्मत्वम्। उत्पत्स्यमानानां उत्पत्तिकामानां (उत्पूर्वात्पदधातोर्लृटि शानच्।) भवादृशां त्वत्सदृशानाम् 'त्यदादिषु दृशोऽनालोचने कञ् च।' इति किन् प्रत्ययः 'आ सर्वनाम्नः' इत्याकारादेशः। संदुधुक्षे प्रदीप्तो बभूव। विगतान्यभ्राणि यस्मात् स व्यभ्रो मेघरहितः। **राजपुरुषेणेति**। स्वधाम स्वावासस्थानम्। उत्ताम्यता दुःखितेन। उपह्वरे रहसि। स्वां प्रकृतिमापन्नं पूर्ववद्रोगनिर्मुक्तं, परमात्मस्वरूपं वा प्राप्तम्। स्वस्थं व्याधिरहितम्, पक्षे स्वःस्थं स्वर्गस्थं 'खर्परे शरि वा विसर्गलोपो

मवलम्बस्व। कतिपयैरेव वासरैः पुनः स्वां प्रकृतिमापन्नं स्वस्थं श्रोष्यसि पितरम्' इति।

गतेषु च भिषक्षु क्षतधृतिः क्षपामुखे क्षितिपालसमीपमेव पुनरारुरोह। तत्र च 'दाहो महान्। आहर हारान् **हरिणि**, मणिदर्पणान्मे देहि देहि **वैदेहि**, हिमलवैर्लिम्प ललाटं **लीलावति**, घनसारक्षोदधूलीर्निधेहि **धवलाक्षि**, निक्षिप चक्षुषि चन्द्रकान्तं **कान्तिमति**, कपोले कलय कुवलयं **कलावति**' इत्येवंप्रायान्पितुरालापाननवरतमाकर्णयन्दूयमानहृदयो दुःखदीर्घो जाग्रदेव निशामनैषीत्।

उषसि चावतीर्य राजद्वारदेशोपसर्पिणा परिवर्धकेनोपस्थापितेऽपि तुरङ्गे चरणाभ्यामेवाजगाम स्वमन्दिरम्। तत्र च त्वरमाणो भ्रातुरागमनार्थमुपर्युपरि क्षिप्रपातिनो दीर्घाध्वगान्प्रजविनश्चोष्ट्रपालान् प्राहिणोत्। प्रक्षालितवदनश्च परिजनोपनीतमपि प्रतिकर्म नाग्रहीत्। दुःखार्तश्च न जगाम राजसद्म। समुत्ससर्ज च सर्वकार्याणि। शयनीये निपत्य उत्तरीयवाससा सोत्तमाङ्गमात्मानमवगुण्ठ्यातिष्ठत्।

अन्यस्मिन्नहनि समीपमस्य राजकुलाद्द्रुतगतिवशविशीर्यमाणालंकारझांकारिणी 'क कुमारः, क कुमारः' इति पुरुषं पृच्छन्ती **वेलेति** नाम्ना **यशोवत्याः** प्रतीहार्याजगाम। विषण्णलोकलोचनप्रत्युद्गता चोपसृत्य कुट्टिमन्यस्तहस्तयुगलाऽधोमुखी विज्ञापितवती— 'देव परित्रायस्व परित्रायस्व। जीवत्येव भर्तरि किमप्यध्यवसितं देव्या' इति।

ततस्तदपरमाकर्ण्य च्युत इव सत्त्वेन, द्रुत इव दुःखेन, अङ्कीकृत इवातङ्केनाप्रतिपत्तिरासीत्। आसीच्चास्य चेतसि प्रतिपन्नसंज्ञस्य— 'बहुशोऽपि

वक्तव्यः' इति वार्तिकेन विसर्गस्य लोपः। **गतेष्विति**। क्षपामुखे प्रदोषे। मणिदर्पणान् रत्नमुकुरान्। घनस्य सार इव शीतलत्वात् घनसारः कर्पूरस्तस्य क्षोदस्य चूर्णस्य धूलीः कणान्। अनैषीत् निनाय ('नीधातोर्लुङ्।') **उषसीति**। परिवर्धकेनाश्वपालेन। उपर्युपरि पुनः पुनः। प्रतिकर्म प्रसाधनम्। उत्तमाङ्गेन सहितं 'वोपसर्जनस्य' इति सहस्य सः। अवगुण्ठ्यावृत्य। **अन्यस्मिन्निति**। द्रुतगतिवशेन त्वरितगतिवशात् विशीर्यमाणैस्त्रुट्यमानैरलंकारैर्भूषणैर्झाङ्कारिणी शब्दायमाना। कुट्टिमे निबद्धायां भूमौ न्यस्तं स्थापितं हस्तयुगलं करद्वयं यया। अध्यवसितं निश्चितम्। **तत इति**। द्रुतो

हृदये दुःखाभिषङ्गो निपतन्नश्मनीव लोहप्रहारः कठिने हुतभुजमुत्थापयति न तु भस्मसात्करोति मे निरनुक्रोशस्य कायम्' इति । उत्थाय च त्वरमाणोऽन्तःपुरमगात् । तत्र च प्रविशन्नेव निर्यान्तीं दत्तसर्वस्वापतेयां गृहीतमरणप्रसाधनाम्, जानकीमिव जातवेदसं पत्युः पुरः प्रवेक्ष्यन्तीम्, प्रत्यग्रस्नानार्द्रदेहतया श्रियमिव भगवतीं सद्यः समुद्रादुत्थिताम्, कुसुम्भबभ्रुणी वाससी दधानाम्, संनिहितप्राणसमं मरणाय चित्तमिव चित्रफलकमविचलं धारयन्तीम्, कञ्चुकिभिरतिवृद्धैरनुगताम्, सपत्नीनामपि पादयोः पतन्तीम्, गृहपतत्रिणामप्यञ्जलिं पुरस्तादुपरचयन्तीम्, पशूनप्यापृच्छमानाम्, भवनपादपानपि परिष्वजमानां मातरं ददर्श ।

दूरादेव च बाष्पायमाणदृष्टिरभ्यधात्—'अम्ब त्वमपि मां मन्दपुण्यं त्यजसि । प्रसीद निवर्तस्व' इत्यभिदधान एव च चरणयोर्न्यपतत् । देवी तु **यशोवती** तथा तिष्ठति पादनिहितशिरसि विमनसि कनीयसि प्रेयसि तनये गुरुणा गिरिणेवोद्वेगावेगेनावष्टभ्यमाना मूर्च्छान्धतमसं रसातलमिव प्रविशन्ती बाष्पप्रवाहेणेव चिरनिरोधसंपिण्डितेन स्नेहसम्भारेण निर्भराविर्भूतेनाभिभूयमाना, कृतप्रयत्नापि निवारयितुं न शशाक बाष्पोत्पतनम् ।

विलीनः । अङ्कीकृतश्चिह्नितः । आतङ्केन भयेन । प्रतिपन्ना प्राप्ता संज्ञा चेतना येन तस्य । दुःखस्याभिषङ्गोऽभिभवः । हुतं हविर्भुङ्क्ते इति तमग्निम् । भस्मसात्करोति भस्मीकरोति । निर्गतोऽनुक्रोशोऽनुकम्पा यस्मात् तस्य निर्दयस्य । निर्यान्तीं निर्गच्छन्तीम् । दत्तं सर्वं स्वापतेयं धनं यया । स्वस्य धनस्य पतिः इति स्वपतिशब्दात् 'पथ्यतिथिवसतिस्वपतेर्ढञ्' इति ढञ् । प्रसाधनं अलंकारः । पत्युः भर्तुः पुरः पूर्वं, जानकीपक्षे समक्षं च । प्रत्यग्रेण नूतनेन स्नानेन आर्द्रः क्लिन्नो देहो यस्यास्तस्या भावः तत्ता । श्रियं लक्ष्मीम् । कुसुम्भेन बभ्रुणी पिङ्गले वाससी वस्त्रे । सन्निहितः स्थापितः पक्षे आलिखितश्च प्राणसमः प्रियकरः यस्मिन् तादृशं चित्तमिव स्वान्तःकरणमिव चित्रफलकं चित्रपटं मरणाय चितारोहणार्थं अविचलं दृढं धारयन्तीम् । समानः पतिर्यासां ताः सपत्न्यः 'नित्यं सपत्न्यादिषु' इति समानस्य सभावः, पतिशब्दस्य नकारादेशश्च । पतन्तं त्रायन्ते इति पतत्राणि पक्षाणि तानि विद्यन्ते येषां ते पतत्रिणः । आपृच्छमानां सभाजयन्तीम् । 'आङि नुप्रच्छ्योरुपसंख्यानम्' इत्यात्मनेपदम् । परिष्वजमानामालिङ्गन्तीम् । **दूरादेवेति** । बाष्पायमाणा बाष्पमुद्वमन्ती दृष्टिर्लोचने यस्य सः । 'बाष्पोष्मभ्यामुद्वमने' इति क्यङ् । विषण्णं मनः यस्य तस्मिन् । अवष्टभ्यमाना स्तम्भिता । मूर्च्छामेवान्धतमसं निबिडान्धकारं 'अवसमन्धेभ्यस्तमसः' इति समासान्तोऽच् । चिरं निरोधेनावष्टम्भेन संपिण्डित एकीकृतस्तेन । निर्भरं नितान्तं आविर्भूतेन

प्रशान्ते च मन्युवेगे सस्नेहमुत्थापयामास सुतम् । हस्तेन चास्य प्ररुदितस्य दृष्टिमुन्ममार्ज । स्वयमपि लोचने पुनःपुनरापूर्यमाणे प्रमृज्य सुतवदनविनिहितनिभृतनयनयुगला चिरं स्थित्वा पुनः पुनरायतं निश्वस्यावादीत् – 'वत्स नासि न प्रियो निर्गुणो वा परित्यागार्हो वा । स्तन्येनैव सह त्वया पीतं मे हृदयम् । परं कुलकलत्रमस्मि चारित्रधना धर्मधवले कुले जाता । वीरजा वीरजाया वीरजननी च मादृशी पराक्रमक्रीता कथमन्यथा कुर्यात् । मर्तुमविधवैव वाञ्छामि । न शक्नोमि दग्धस्य भर्तुरार्यपुत्रविरहिता रतिरिव निरर्थकान् प्रलापान् कर्तुम् । पितुश्च ते पादधूलिरिव प्रथमं गगनगमनमावेदयन्ती बहुमता भविष्यामि शूरानुरागिणीनां सुराङ्गनानाम् । तदहमेव त्वां तावत्तात प्रसादयामि न पुनर्मनोरथप्रातिकूल्येन कदर्थनीयास्मि ।' इत्युक्त्वा पादयोरपतत् ।

स तु ससंभ्रममपनीय चरणयुगलमवनमिततनुरुभयकरविधृतवपुषमवनिगतशिरसमुदनमयन्मातरम् । दुर्निवारतां च शुचः समवधार्य कुलयोषिदुचितां तामेव श्रेयसीं मन्यमानः क्रियां कृतनिश्चयां च तां ज्ञात्वा तूष्णीमधोमुखोऽभवत् ।

देव्यपि **यशोवती** परिष्वज्य सामाघ्राय च शिरसि निर्गत्य चरणाभ्यामेव **सरस्वती**तीरं ययौ तत्र च चित्रभानुं प्राविशत् । इतरोऽपि मातृमरणाविह्वलो बन्धुवर्गपरिवृतः पितुः पार्श्वं प्रायात् । अपश्यच्च स्वल्पावशेषप्राणवृत्तिं परिवर्तमानतारकं जनयितारम् । असह्यशोकोद्रेकाभिद्रुतश्च त्याजितः

प्रकटितेन । बाष्पोत्पतनं अश्रुप्रवाहम् । **प्रशान्त इति** । मन्युवेगे दुःखावेशे । सुतस्य वदने मुखे विनिहितं निवेशितं निभृतं निश्चलं नयनयुगलं यया सा । स्तने भवं स्तन्यं दुग्धम् । शूरेऽनुरागः प्रेम स विद्यते आसामिति तासाम् । सुराङ्गनानां देवपत्नीनामभिमता संमता । 'मतिबुद्धिपूजार्थेभ्यश्च' इति वर्तमाने क्तः । 'क्तस्य च वर्तमाने' इति कर्तरि षष्ठी । मनोरथस्य इच्छायाः प्रातिकूल्येन विरोधेन । न कदर्थनीया न पीडनीया 'कोः कत्तत्पुरुषेऽचि' इति कदर्थशब्दात् 'तत्करोति तदाचष्टे' इति णिजन्तात् अनीयर् । **स इति** । सम्भ्रमेण वेगेन सहितं यथा स्यात्तथा । उभयकराभ्यां विधृतमवलम्बितं वपुर्यस्यास्ताम् । समवधार्य विचार्य । कुलयोषितः कुलीनस्त्रिय उचितां योग्याम् । **देवीति** । चित्रा नानावर्णा भानवो रश्मयो यस्य तमग्निम् । इतरोऽपि हर्षोऽपि । स्वल्पोऽत्यल्पोऽवशिष्टांशो यस्यास्तादृशी प्राणवृत्तिर्जीवितं यस्य तम् । परिवर्तमाने घूर्णिते तारके कनीनिके यस्य तम् । तारकाक्ष्णः

स्नेहेन धैर्यम् । आश्लिष्यास्य सकलदुर्मदमहीपालमौलिमालालालितौ पादपद्मौ अच्छाच्छमश्रुस्रोतसां संतानं वर्षन्नितरवद्विमुक्तारावश्चिरं रुरोद ।

राजा तु तमुपरुध्यमानदृष्टिरविरतरुदितशब्दाश्रितश्रवणः प्रत्यभिज्ञाय शनैः शनैरवादीत् । 'पुत्र नार्हस्येवं भवितुम् । भवद्विधा न ह्यमहासत्त्वाः । सत्त्ववतां चाग्रणीः सर्वातिशयाश्रितः क्व भवान् क्व वैक्लव्यम्' – इत्येवं वदन्नेवापुनरुन्मीलनाय निमिमील राजसिंहो लोचने ।

अस्मिन्नेवान्तरे पूषाप्यायुषेव तेजसा व्ययुज्यत । ततो नाकपथप्रस्थितपार्थिवप्रत्युद्गतपुरुहूतातपत्र इव पूर्वस्यां दिशि दृश्यमाने चन्द्रमसि नरेन्द्रः स्वयं समर्पितस्कन्धैर्गृहीत्वा शवशिबिकां सामन्तैः पौरैश्च पुरोहितपुरःसरैः सरितं **सरस्वतीं** नीत्वा नरपतिसमुचितायां चितायां हुताशसत्क्रियया यशःशेषतामनीयत ।

इति हर्षचरितसारे महाराजमरणवर्णनं नाम द्वितीय उच्छ्वासः ।

कनीनिका' इत्यमरः । जनयितारं पितरम् । शोकोद्रेको दुःखावेगः । 'त्याजितः' इति द्विकर्मकात् त्यजधातोर्णिजन्तात्कर्मणि क्तः । सकलानां दुर्मदानामुद्धतानां महीपालानां नृपाणां मौलीनां शिरसां मालाभिः पङ्क्तिभिर्लालितौ पूजितौ । अच्छाच्छमतिविमलम् । इतरवत् प्राकृतजनवत् । **राजेति** । उपरुध्यमाना क्षीयमाणा दृष्टिर्दर्शनं यस्य । अविरतं सततं रुदितं क्रन्दनं तस्य शब्देन ध्वनिना आश्रितेऽवलम्बिते श्रवणे कर्णौ यस्य सः । अवादीत् अब्रवीत् वदधातोर्लुङ् । सत्त्ववतां धीराणाम् । अग्रं नयतीति अग्रणीः 'सत्सूद्विषद्रुह–' इति क्विप् 'अग्रग्रामाभ्यां नयतेर्णो वाच्यः' इति वार्तिकेन णत्वम् । वैक्लव्यम् व्याकुलत्वम् । अपुनरुन्मीलनाय अप्रबोधाय लोचने निमिमील पञ्चत्वं प्रापेत्यर्थः । **अस्मिन्निति** । पूषा सूर्यः । नाकस्य स्वर्गस्य पन्थाः नाकपथः 'ऋक्पूरब्धूः—' इति 'अ' प्रत्ययः । 'नस्तद्धिते' इति टिलोपः । तं प्रस्थितं पार्थिवं प्रति प्रत्युद्गतस्य संमाननार्थमागतस्य पुरुहूतस्येन्द्रस्य आतपत्रे इव छत्रे इव । पुरे भवाः पौराः । हुताशसत्क्रिययाऽग्निसंस्कारेण । यशः एव शेषो यस्य तस्य भावस्तत्ता । देहदाहानन्तरं तस्य कीर्तिरेव भुव्यवशिष्टेति भावः ।

इति हर्षचरितसारस्य बालमनोरमाख्यां व्याख्यायां द्वितीयोच्छ्वासः ।

तृतीय उच्छ्वासः ।

विस्रब्धघातदोषः स्ववधाय खलस्य वीरकोपकरः ।
नवतरुभङ्गध्वनिरिव हरिनिद्रातस्करः करिणः ॥

अथ गतेषूद्वेजनीयेष्वशौचदिवसेषु, चक्षुर्दाहदायिनि दीयमाने द्विजेभ्यः शयनासनचामरातपत्रशस्त्रादिके नृपनिकटोपकरणकलापे, नीतेषु तीर्थस्थानानि कीकसेषु, सुधानिचयाचिते चिताचैत्यचिह्ने, देवो **हर्षः** कदाचिदुत्सृष्टव्यापारः पुञ्जीभूतवृद्धबन्धुवर्गाग्रेसरेणावनतमूकमुखेन महाजनेन मौलेनाकाल आत्मानं वेष्टयमानमद्राक्षीत् । दृष्ट्वा चाकरोन्मनसि–'किमन्यदार्यमागतमावेदयत्ययं शोकपराभूतो लोकाकरः' इति । वेपमानहृदयश्च पप्रच्छ प्रविशन्तमधिकतरप्रचारमन्यतमं पुरुषम् 'अङ्ग कथय किमार्यः प्राप्तः, इति । स मन्दमब्रवीत् – 'देव यथादिशसि द्वारि' इति । श्रुत्वा च सोदर्यस्नेहनिहितनिरतिशयमन्युमृदूकृतमनाः 'कथमपि न ववाम बाष्पवारिप्रवाहोत्पीडेन सह जीवितम् । आवेगोद्गतकृत्स्नस्नेहोत्कलिकाकलापोत्क्षिप्यमाणकाय इव च परवशः समुदगात् ।

गौडापसदेन विश्वास्य कृतं राज्यवर्धनवधं तन्निमित्तां च हर्षवर्धनस्य तद्वधप्रतिज्ञां सूचयति **विस्रब्धेति** । खलस्य दुष्टस्य वीरकोपकरः शूरजनमन्यूद्दीपकः विस्रब्धस्य विश्वस्तस्य घातो वध एव दोषः स्ववधाय स्वनाशाय 'कल्पते' इति शेषः । 'क्लृपि संपद्यमाने च' इति चतुर्थी । तत्रोपमामुदाहरति । करिणो हस्तिनः हरेः सिंहस्य निद्रायाः स्वापस्य तस्करोऽपहारकः नवस्य तरोर्वृक्षस्य भङ्गस्य ध्वनिः शब्द इव । स यथा करिनाशाय संपद्यते तद्वत् । **अथेति** । उद्वेजनीयेषु उद्वेजकेषु । 'कृत्यल्युटो बहुलम्' इति कर्तरि कृत्यप्रत्ययः । अशुचेर्भावः अशौचं 'नञः शुचीश्वर–' इति सूत्रेणोत्तरपदस्यादेरचो वृद्धिः । तस्य दिवसेषु 'दशाहं शावमाशौचं सपिण्डेषु विधीयते' इति स्मृतेर्दशसंख्याकेषु । चक्षुर्दाहं नयनसंतापं ददातीति तस्मिन् नृपस्मारकत्वादिति भावः । नृपस्य निकटोपकरणानां समीपस्थवस्तूनां कलापे समूहे । कीकसेष्वस्थिषु । उत्सृष्टव्यापारस्त्यक्तक्रियः । मूलादागतः मौलः वंशपरंपरया राजसेवक इत्यर्थः । आर्यं ज्येष्ठभ्रातरं राज्यवर्धनम् । शोकपराभूतो दुःखपरवशः । लोकाकरो जनसमूहः । अधिकतरः सातिशयः प्रचारः गमनागमनं यस्य । समानोदरे शयितः सोदर्यः । 'सोदराद्यः' इति यप्रत्ययः । तस्मिन् स्नेहेन प्रेम्णा निहितः निरतिशयः नितान्तः मन्युः दुःखं तेन

अथ दूरादेव दृष्ट्वा देवो **राज्यवर्धन**श्चिरकालकलितं बाष्पवेगं मुमुक्षुः सुदूरप्रसारितेन दीर्घेण दोर्दण्डद्वयेन गृहीत्वा कण्ठे, मुक्तकण्ठं पुनः पतितक्षौमे क्षामे वक्षसि, पुनः कण्ठे, पुनः स्कन्धभागे, पुनः कपोलोदरे निधाय तथा तथा रुरोद यथा सबन्धनानीवोदपाटयन्त हृदयानि। स्मृतनृपतिना राजवल्लभेनापि निर्भरमरुद्यत। सुचिराच्च कथं कथमपि निर्वृष्टनयनजलः पर्जन्य इव शरदि स्वयमेवोपशशाम। उपविष्टश्च परिजनोपनीतेन तोयेन कथं कथमपि चक्षुरक्षालयत्। तूष्णीमेव चिरं स्थित्वोत्थाय स्नानभूमिमगात्। तस्यां च स्थित्वा विभूषं वित्रस्तव्यस्तकुन्तलं मौलिमनादरान्निष्पीडय चतुःशालवितर्दिकायां नीचापाश्रयविनिहितैकोपबर्हायां पर्यङ्किकायां निपत्य जोषमस्थात्।

देवोऽपि **हर्ष**स्तथैव स्नात्वा धरणितलनिहितकुथाप्रसारितमूर्तिरदूर एवास्य तूष्णीमेव समवातिष्ठत। दृष्ट्वा दृष्ट्वा दूयमानमानसमग्रजन्मानं समस्फुटदिवास्य सहस्रधा हृदयम्। औरसदर्शनं हि यौवनं शोकस्य। लोकस्य तु नरपतिमरणदिवसादपि दारुणः स बभूव दिवसः। सर्वस्मिन्नेव नगरे न केनचिदपाचि न केनचिदस्नायि नाभोजि सर्वत्र सर्वेणारोदि। केवलमनेन क्रमेणातिचक्राम दिवसः। स च प्रत्यग्रत्वष्टृटङ्कतष्टतनुरिव वहद्बहलरुधिररसमांसच्छ-

---

मृदूकृतं कोमलीकृतं मनः यस्य। जीवितं न वव्राम गतासुर्न बभूवेत्यर्थः। आवेगेन उद्गतः प्रादुर्भूतः कृत्स्नस्नेहः सकलानुराग एव उत्कलिकानां वीचीनां कलापः समूहस्तेन उत्क्षिप्यमाणः ऊर्ध्वं प्रेर्यमाणः कायः शरीरं यस्य तादृशः। **अथेति**। चिरकालं कलितं नियमितम्। मोक्तुमिच्छुः मुमुक्षुः 'सनाशंसभिक्ष उः'। दोर्दण्डद्वयेन भुजाभ्याम्। कण्ठे गृहीत्वा आश्लिष्य। पतितं क्षौमं दुकूलं यस्मात् तादृशे। क्षामे कृशे। निर्वृष्टं निःशेषितं नयनजलं अस्रं येन सः। उपशशाम शान्तो बभूव। विगता भूषा भूषणानि यस्मात् तादृशम्। वित्रस्ता व्यस्ताश्च कुन्तलाः केशा यस्य तं मौलिं शिरः। चतस्रः अन्योन्याभिमुखाः शाला गृहाणि यस्य तस्य वितर्दिकायां वेदिकायाम्। नीचे निम्ने अपाश्रये विताने विनिहितः स्थापितः उपबर्हः उपधानं यस्याम्। पर्यङ्किकायां खट्वायाम्। **देव इति**। कुथा चित्रकम्बलः। समवातिष्ठत 'समवप्रविभ्यः स्थः' इत्यात्मनेपदम्। दूयमानं दुःखितं मानसं चित्तं यस्य तम्। उरसा निर्मितः औरसः 'उरसोऽण् च' इत्यण्प्रत्ययः। शोकस्य यौवनं दुःखस्योद्दीपकमित्यर्थः। अपाचि अपच्यत पचधातोः कर्मणि लुङ्। 'चिण् भावकर्मणोः' इति चिण्। अस्नायि स्नाधातोः कर्मणि लुङि चिण्। 'आतो युक् चिण्कृतोः' इति युक्। प्रत्यग्रं

विरपरपारावारपयसि ममज्ज मञ्जिष्ठारुणोऽरुणसारथिः। प्रकटकलङ्कमुदयमानं विशङ्कटविषाणोत्कीर्णपङ्कसंकरशंकरशकुरशक्करककुदकूटसंकाशमकाशत काशे शंशाङ्कमण्डलम्।

प्रभातायां च शर्वर्यां सर्वेषु प्रविष्टेषु राजसु समीपस्थितं **हर्षदेव**मुवाच— 'तात भूमिरसि गुरुनियोगानाम्। शैशव एवाग्राहि भवता तातस्य चित्तवृत्तिः। यतो भवन्तमेवंविधं विधेयं विधिविधानोपनतनैर्घृण्यमिदं किमपि बिभणिषति मे हृदयम्। नावलम्बनीया बालभावसुलभा प्रेमविलोमा वामता। वैधेय इव मा कृथाः प्रत्यूहमीहितेऽस्मिन्। न खलु न जानासि लोकवृत्तम्। लोकत्रयत्रातरि **मान्धातरि** मृते किं कृतं **पुरुकुत्सेन**, भ्रूलतादिष्टाष्टादशद्वीपे **दिलीपे** वा **रघुणा**, महासुरसमरमध्याध्यासितत्रिदशरथे **दशरथे** वा **रामेण**, गोष्पदीकृतचतुरुदन्वदन्ते **दुष्यन्ते** वा **भरतेन**। तिष्ठन्तु तावदेते तातेनैव सुगृहीतनाम्नि तत्रभवति परासुतां गते पितरि किं नाकारि राज्यम्। यं च किल शोकं समभिभवति तं कापुरुषमाचक्षते शास्त्रविदः। स्त्रियो हि विषयः

नूतनं त्वष्ट्रा विश्वकर्मणा टङ्केण छेदनशस्त्रेण तष्टा तनूकृता तनुर्देहो यस्य स इवेत्युत्प्रेक्षा। वहत् तदङ्गात्स्रवत् बहलं प्रभूतं रुधिरं रस इव, मांसं च, तदिव छविः कान्तिर्यस्य सः, अतिरक्तवर्ण इत्यर्थः। अपरपारावारपयसि पश्चिमसागरजले। माञ्जिष्ठावत् रक्तवर्णलतावत् अरुणो रक्तवर्णः। अरुणः सारथिर्यस्य स सूर्यः। पुरा त्वष्टा संज्ञानाम्नीं स्वदुहितरं सूर्याय ददौ। तत्तेजोऽसहमानायास्तस्याश्च कृते स स्वजामातरं स्वयन्त्रे स्थापयित्वोदलिखदिति कथात्रानुसंधेया। प्रकटो विस्पष्टः कलङ्कः अङ्कः पक्षेऽपवादश्च यस्य तत् 'कलङ्कोऽङ्कापवादयोः' इत्यमरः। विशङ्कटाभ्यां विशालाभ्यां विषाणाभ्यां शृङ्गाभ्यां उत्कीर्ण उत्खातः पङ्कः कर्दमस्तस्य संकरः संयोगः यस्मिंस्तत्, शंकरस्य शकुरो दान्तः शक्करो वृषभस्तस्य ककुदं कूटमिव तेन संकाशं सदृशम्, पङ्काचिह्नितं शुभ्रं शिववृषभककुदमिवेत्यर्थः। शशाङ्कस्य चन्द्रमसो मण्डलं बिम्बं पक्षे तन्नाम्नोऽनन्तरं राज्यवर्धनघातकस्य गौडाधिपस्य द्वादशनृपतिचक्रम्। अकाशत शुशुभे। **प्रभातायामिति**। गुरुनियोगानां गुर्वाज्ञानाम्। भूमिः पात्रम्। अग्राहि अगृह्यत कर्मणि लुङि चिण्। विधेयं वचनस्थम्। विधिविधानेन दैवकर्मणा उपनतं प्राप्तं नैर्घृण्यं निर्दयता येन तादृशम्। बिभणिषति भणितुमिच्छति (भण्+सन्+लट्)। बालभावसुलभा बाल्यसहजा। प्रेम्णः स्नेहस्य विलोमा विरुद्धा वामता प्रतिकूलता। लोकवृत्तम् लोकव्यवहारम्। महासुराणां प्रबलराक्षसानां समरस्य रणस्य मध्येऽध्यासितः त्रिदशरथः सुररथः येन तस्मिन्। गोः पदं गोष्पदम्। प्रमाणार्थे 'गोष्पदं सेवितासेवितप्रमाणेषु' इति सूत्रेण निपातः। गोष्पदीकृताः गोपदमितप्रदेशवत् सुलंघ्याः कृताः चत्वार उदन्वन्तः सागरा

शुचाम्। तथापि किं करोमि। स्वभावस्य सेयं कापुरुषता वा स्त्रैणं वा यदेवमास्पदं पितृशोकहुतभुजो जातोऽस्मि। न शक्नोति मे हृदयं तादृशस्य सुमेरुकल्पस्य महापुरुषस्य विनिपातमश्रुभिरेव केवलैरतिवाहयितुम्। सोऽहमिच्छामि मनसि वाससीव सुलग्नं स्नेहमलमिदममलैः शिखरिशिखरप्रस्रवणस्वच्छस्रोतोऽम्बुभिः क्षालयितुमाश्रमपदे। अतस्त्वमन्तरितयौवनसुखामनभिमतामपि जरामिव पूरुराज्ञया गुरोर्गृहाण मे राज्यचिन्ताम्। परित्यक्तं मया शस्त्रम्' इत्येवमभिधाय निजं निस्त्रिंशमुत्ससर्ज धरण्याम्।

अथ तच्छ्रुत्वा निशितशिखेन शूलेनेवाहतः प्रविदीर्णहृदयो देवो हर्षः समचिन्तयत्– 'किं नु खलु मामन्तरेणार्यः केनचिदसहिष्णुना किंचिद् ग्राहितः कुपितः स्यात्। उतानया दिशा परीक्षितुकामो माम्। उत शोकजन्मा चेतसः समाक्षेपोऽयमस्य। आहोस्विदार्य एवायं न भवति। किं वार्येणान्यदेवाभिहितमन्यदेवाश्रावि मया शोकशून्येन श्रवणेन्द्रियेण। आर्यस्य वान्यदेव विवक्षितमन्यदेवापतितं मुखेन। किं वा ममानेन वृथा बहुधा विकल्पितेन तूष्णीमेवार्यमनुगमिष्यामि। गुरुवचनातिक्रमकृतं किल्बि-

---

येन तस्मिन्। 'उदन्वानुदधौ च' इति निपातः। सुगृहीतं पुण्यं नाम यस्य तस्मिन्। परासुतां गते मृते। कुत्सितः पुरुषः कापुरुषः 'विभाषा पुरुषे' इति कोः कादेशः। स्त्रियो भावः स्त्रैणम्। सुमेरुकल्पस्य सुमेरुसदृशस्य। 'ईषदसमाप्तौ–' इति कल्पप् प्रत्ययः। विनिपातं निधनम्। स्नेहमलं प्रेमदोषं पक्षे तैलजन्यं कालिमानम्। शिखरिणः पर्वतस्य शिखरस्य प्रस्रवणस्य निर्झरस्य स्रोतसः प्रवाहस्य अम्बुभिः उदकैः। अन्तरितं विघ्नितं यौवनसुखं यया तादृशीं जरां राज्यचिन्तां च। अनभिमतां अप्रियाम्। पूरुः ययातेः पुत्रः यः किल स्वपितुराज्ञया तज्जरां गृहीत्वा तस्मै स्वयौवनं विततार। गुरोः ज्येष्ठभ्रातुः पक्षे पितुश्च आज्ञया आदेशेन। निर्गतस्त्रिंशतोऽङ्गुलिभ्य इति निस्त्रिंशः खड्गः। उत्ससर्ज परित्यक्तवान्। तच्छ्रुत्वेति। निशिता तीक्ष्णीकृता शिखा अग्रं यस्य तेन शूलेन शस्त्रविशेषेण। मामन्तरेण मामुद्दिश्य 'अन्तरान्तरेणयुक्ते' इति द्वितीया। असहिष्णुना मत्कल्याणमसहमानेन शत्रुणा। ग्राहितः बोधितः ग्रहेर्णिजन्तात्कर्मणि क्तः। परीक्षितुं मदाशयं निर्णेतुं कामः इच्छा यस्य सः। 'लुम्पेदवश्यमः कृत्ये तुं काममनसोरपि' इति मकारलोपः। शोकजन्मा दुःखादुद्भूतः। चेतसः समाक्षेपः व्याक्षेपः। अश्रावि श्रुतम् कर्मणि लुङ्। विवक्षितं वक्तुमिष्टम्। किं विकल्पितेन चिन्तनेन साध्यं नेत्यर्थः। वचनातिक्रमः आज्ञाभङ्गः। किल्बिषं पापम्। अपास्यति दूरीकरिष्यति। अवधार्य निश्चित्य। प्रथमतरं स्वभ्रातुः पूर्वमेव। अवातिष्ठत–'समवप्रविभ्यः स्थः'

षमेतत्तपोवन तप एवापास्यति।' इत्यवधार्य मनसा प्रथमतरं गतस्तपोवनमधोमुखस्तूष्णीमवातिष्ठत।

अत्रान्तरे पूर्वादिष्टेनैव रुदता वस्त्रकर्मान्तिकेन समुपस्थापितेषु वल्कलेषु, अब्रह्मण्यमूर्ध्वदोष्णि विरुदति विप्रजने, पादप्रणतिपूरे फूत्कुर्वति पौरवृन्दे, निश्वसत्सु सामन्तेषु, सबालवृद्धासु तपोवनाय प्रस्थितासु सर्वासु प्रजासु, सहसैव प्रविश्य शोकविक्लवः प्रक्षरितनयनसलिलो राज्यश्रियः परिचारकः **संवादको** नाम प्रज्ञाततमो विमुक्ताक्रन्दः सदस्यात्मानमपातयत्।

अथ संभ्रान्तो भ्रात्रा सह स्वयं देवो **राज्यवर्धनस्तं** पर्यपृच्छत्– 'भद्र, भण भण किमस्मद्व्यसनव्यवसायवर्धनबद्धधृतिः, अवनिपतिमरणमुदितमतिः, अधृतिकरमपरमधिकतरमितः समुपनयति विधिः' इति। स कथं कथमप्यकथयत्। देव पिशाचानामिव नीचात्मनां चरितानि छिद्रप्रहारीणि प्रायशो भवन्ति। यतो यस्मिन्नहन्यवनिपतिरुपरत इत्यभूद्वार्ता तस्मिन्नेव देवो **ग्रहवर्मा** दुरात्मना **मालवराजेन** जीवलोकमात्मनः सुकृतेन सह त्याजितः। भर्तृदारिकापि **राज्यश्रीः** कालायसनिगडयुगलचुम्बितचरणा चौराङ्गनेव संयता **कान्यकुब्जे** कारायां निक्षिप्ता। किंवदन्ती च यथा किलानायकं साधनं मत्वा जिघृक्षुः सुदुर्मतिरेतामपि भुवमाजिगमिषति।' इति विज्ञापिते प्रभुः प्रभवति।

इत्यात्मनेपदम्। **अत्रान्तर इति**। अन्तः सामीप्यमस्यास्तीति अन्तिकः वस्त्रकर्मण्यन्तिकः वस्त्रागारिकः। ब्रह्मणि वेदे साधु ब्रह्मण्यम्। 'तत्र साधुः' इति 'यत्' प्रत्ययः। न ब्रह्मण्यम् अब्रह्मण्यम् हिंसाया वेदनिन्दितत्वात्। ऊर्ध्वौ दोषौ भुजौ यस्य 'पद्न्नोमा-' इति सूत्रेण दोःशब्दस्य 'दोषन्' आदेशः। फूत्कुर्वति उद्दाममाक्रन्दति। संश्लिष्टः अन्तः एकदेशः यस्य स समन्तः तस्येश्वरः सामन्तः समीपवर्तिदेशाधिपः। विक्लवः व्याकुलः। परिचारकः सेवकः। विमुक्तः आक्रन्दः येन स विलापं कुर्वन्नित्यर्थः। सदसि सभागृहे। **अथेति**। संभ्रान्तः किंकर्तव्यमूढः। अस्माकं व्यसनं विपत्तिः तत्र व्यवसायः उद्यमः तस्य वर्धने बद्धधृतिः कृतनिश्चयः। अवनिपतेः राज्ञः प्रभाकरवर्धनस्य मरणेन मुदितमतिः आनन्दितः। अधृतिकरं मनःस्थैर्यनाशकम्। विधिः दैवम्। कथं कथमपि महता कष्टेन। छिद्रेषु रन्ध्रेषु प्रहरन्तीति। जीवलोकं त्याजितः मारित इत्यर्थः। आत्मनः सुकृतेन सह– ग्रहवर्मवधेन मालवराजस्याखिलं पुण्यं विनष्टमिति भावः। सहोक्त्यलंकारः। कालायसस्य लोहस्य निगडयुगलेन शृंखलाभ्यां चुम्बितौ स्पृष्टौ चरणौ यस्याः सा। संयता बद्धा। कारायां बन्दिगृहे। किंवदन्ती जनप्रवादः। साधनं सैन्यम्। जिघृक्षुः ग्रहीतुकामः ग्रहः सन्नन्तादुप्रत्ययः। आ-

ततश्च तादृशमनुपेक्षणीयमसंभावितमाकस्मिकमपरं व्यतिकरमाकर्ण्याश्रुतपूर्वत्वात्परिभवस्य, परपरिभवासहिष्णुतया च स्वभावस्य, दर्पबहुलतया च नवयौवनस्य, वीरक्षेत्रसंभवत्वाच्च जन्मनः, कृपाभूमिभूतायाश्च स्वसुः स्नेहात्स तादृशो बद्धमूलोऽप्यत्यन्तगुरुरेकपद एवास्य ननाश शोकावेगः। प्रथीयसि ललाटपट्टे भीषणा भ्रुकुटिरुदपद्यत। संगलत्स्वेदसलिलपूरितोदरो निर्मूलं मालवोन्मूलनाय पुनरपि समुत्ससर्प भीषणं कृपाणं दक्षिणः पाणिः। दर्पस्फुटितसरसव्रणोच्छलितरुधिरच्छटावसेकैः शोकविषप्रसुप्तं प्रबोधयन्निव पराक्रममनुजमवादीत्– 'आयुष्मन्, इदं राजकुलम्, अमी बान्धवाः, परिजनोऽयम्, इयं भूमिः, भूपतिभुजपरिघपालिताश्चैताः प्रजाः, गतोऽहमद्यैव मालवराजकुलप्रलयाय। इदमेव तावद्वल्कलग्रहणमिदमेव तपः शोकापगमोपायश्चायमेव यदत्यन्ताविनीतारिनिग्रहः। अन्तरितस्तापो मे महीयसा मन्युना। तिष्ठन्तु सर्व एव राजानः करिणश्च त्वयैव सार्धम्। अयमेको भण्डिरयुतमात्रेण तुरङ्गमाणामनुयातु माम्' इत्यभिधाय चानन्तरमेव प्रयाणपटहमादिदेश। तस्मिन्नेव च वासरे निर्जगामाभ्यमित्रम्।

अथ तथागते भ्रातरि, उपरतेच पितरि, प्रोषितजीविते च जामातरि, मृतायां च मातरि, संयतायां च स्वसरि, स्वयूथभ्रष्ट इव वन्यः करी देवो हर्षः कथं कथमप्येकाकी कालं तमनैषीत्। अतिक्रान्तेषु बहुषु वासरेषु

जिगमिषति आगन्तुमिच्छति। **ततश्चेति**। अनुपेक्षणीयं अवश्यं प्रतिकर्तव्यम्। असंभावितं अतर्कितम्। आकस्मिकं अकस्माद्भवम् 'विनयादिभ्यष्ठक्'। व्यतिकरं व्यसनम्। परिभवस्तिरस्कारः। वीरक्षेत्रात् शूरवंशात् संभव उत्पत्तिर्यस्य तस्य भावः तस्मात्। स्वसुः राज्यश्रियः। बद्धमूलः दृढः। एकपदे अकस्मात्। प्रथीयसि अतिविशाले। पृथुशब्दात् ईयसुप्रत्यये 'टेः' इति सूत्रेण टिलोपः। ललाटं पट्टमिव विस्तीर्णम्। संगलत् स्वेदसलिलं घर्मजलं तेन पूरितं उदरमन्तर्भागो यस्य। दर्पेणाभिमानेन स्फुटिता भिन्नाः सरसव्रणा आर्द्रक्षतानि तेभ्य उच्छलितानां उद्गतानां रुधिरच्छटानां रक्तधाराणां अवसेकैः। प्रबोधयन् जागरयन्। परिघो लोहमुद्गरः। अन्तरितः अपाकृतः। अयुतमात्रेण दशसहस्रप्रमाणेन 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः।' प्रयाणपटहमादिदेश प्रयाणसूचनार्थं भेरी ताड्यतामित्याज्ञापयामास। अभ्यमित्रं जगाम शत्रुमभिययौ 'लक्षणेनाभिप्रती आभिमुख्ये' इत्यव्ययीभावः। **अथेति**। उपरते मृते। प्रोषितं परलोकं गतं जीवितं यस्य तस्मिन् मृते इत्यर्थः। स्वयूथात् स्वसजातीयसमूहात् भ्रष्टः। वने भवः वन्यः। आस्थानं सदोगृहं गतः तत्र स्थितः।

आस्थानगतः सहसैव प्रविशन्तम्, अनुप्रविशता विषण्णवदनेन लोकेनानुगम्यमानम्, मलिनेन पटेन प्रावृतवपुषम्, जीवितधारणलज्जयेवावनतमुखम्, नासावंशस्याग्रे ग्रथितदृष्टिम्, दुःखदूरप्ररूढरोम्णा मूकेनापि मुखेन स्वामिव्यसनमविच्छिन्नैरश्रुबिन्दुभिर्विज्ञापयन्तं, **कुन्तलं** नाम बृहदश्ववारं राज्यवर्धनस्य प्रसादभूमिमभिजाततमं ददर्श। तस्माच्च हेलानिर्जितमालवानीकमपि **गौडाधिपेन** मिथ्योपचारोपचितविश्वासं मुक्तशस्त्रमेकाकिनं विश्रब्धं स्वभवन एव भ्रातरं व्यापादितमश्रौषीत्।

श्रुत्वा च महातेजस्वी प्रचण्डकोपपावकप्रसरपरिचीयमानशोकावेगः सहसैव प्रजज्वाल। अवादीच्च '**गौडाधिप**मपहाय कस्तादृशं महापुरुषं तत्क्षण एव निर्व्याजभुजवीर्यनिर्जितसमस्तराजकं मुक्तशस्त्रमीदृशेन सर्वलोकविगर्हितेन मृत्युना शमयेदार्यम्। कथमिवास्यार्यजीवितहरणे प्रसृतः करः। कां नु गतिं गमिष्यति कां वा योनिं प्रवेक्ष्यति कस्मिन् वा नरके निपतिष्यति। श्वपाकोऽपि क इदमाचरेत्। नामापि गृह्णतोऽस्य पापकारिणः पापमलेन लिप्यत इव मे जिह्वा। केदानीं यास्यति दुर्बुद्धिः।'

इत्येदभिदधत एवास्य पितुरपि मित्रं सेनापतिः समग्रविग्रहप्राग्रहरः प्रांशुरतिशौर्योष्मणेव परिपाकमागतो गतभूयिष्ठे वयसि वर्तमानः, बहुशर-

---

प्रावृतं छन्नं वपुः देहो यस्य। नासावंशस्य नासिकायाः। दुःखेन शोकेन दूरं प्ररूढानि अतिप्रवृद्धानि रोमाणि केशा यस्मिन् तेन। मूकेन निःशब्देन। स्वामिनः प्रभोः राज्यवर्धनस्य। व्यसनं संकटम्। अश्वं वारयतीति अश्ववारः अश्वारोहः। बृहन्तं महान्तं अश्ववारम्। प्रसादभूमिं अनुग्रहविषयम्। हेलया लीलया निर्जितं पराजितं मालवस्य अनीकं सैन्यं येन तम्। मिथ्या असत्येन उपचारेण आदरादिना उपचितो वर्धितो विश्वासो यस्मिन् तेन। अश्रौषीत् श्रुतवान् (श्रु+लुङ्)। **श्रुत्वेति**। प्रचण्डस्य महतः कोपपावकस्य क्रोधाग्नेः प्रसरेण परिचीयमानो वर्धमानः शोकावेगो दुःखावेशो यस्य। प्रजज्वाल प्रदीप्तो बभूव। अपहाय वर्जयित्वा। निर्व्याजं निष्कपटं भुजवीर्यं बाहुबलं तेन निर्जितं समस्तराजकं सकलराजसमूहो येन तम्। राजन्-शब्दात् 'गोत्रोक्षोष्ट्रोरभ्र–' इति समूहार्थे वुञ्। सर्वलोकैः समस्तजनैः विगर्हितेन निन्दितेन। शमयेत् घातयेत्। शमेर्मित्त्वात् 'मितां ह्रस्वः' इति ह्रस्वः। श्वानं पचतीति श्वपाकः 'कर्मण्यण्'। 'न्यङ्क्वादीनां च' इति कुत्वम्। **इत्येतदिति**। समग्रेषु सकलेषु विग्रहेषु रणेषु प्राग्रहरोऽग्रेसरः। 'अस्त्रियां समरानीकरणाः कलहविग्रहौ' इत्यमरः। परिपाकं परिणतिं पूर्णतां आगतः।

शयनसुप्तोत्थितोऽपि हसन्निव **शान्तनव**मतिदीर्घेणायुषा, दुरभिभवशरीरतया जरयापि भीतभीतयेव प्रकटितप्रकम्पया परामृष्टः कथमपि सारमयेषु शिरोरुहेषु, मृतमपि हृदयास्थितं स्वामिनमिव सितचामरेण वीजयन्नाभिलम्बेन कूर्चकलापेन, परिणामेऽपि धौतासिधाराजलपानतृषितैरिव विवृतवदनैर्बृहद्भिर्व्रणविदारैर्विषमितविशालवक्षाः, सन्निधावेव समुपविष्टः **सिंहनाद**नामा स्वरेणैव दुन्दुभिघोषगम्भीरेण सुभटानां समररसमानयन्विज्ञापितवान् 'देव न क्वचित्कृताश्रयया मलिनया मलिनतराः कापुरुषा हतलक्ष्म्या विप्रलभ्यमानमात्मानं न चेतयन्ते। किं वा करोतु वराकः येनातिभीरुतया नित्यपराङ्मुखेन न दृष्टान्येव कुपितानां तेजस्विनां मुखानि। नासौ तपस्वी जानाति यथाभिचारा इव विप्रकृताः सद्यः सकलकुलप्रलयमुपहरन्ति मनस्विनः। योऽहितहतस्वजनो मनस्विजनो द्विषद्योषिदुरस्ताडनेन कथयति हृदयदुःखम्, विपक्षवनिताचक्षुषा ददाति जलं स श्रेयान्नेतरः। न च स्वप्नदृष्टनष्टेष्विव क्षणिकेषु

यथा फलं ऊष्मणा परिपाकमागच्छति पक्कं भवति तद्वत्। गतं भूयिष्ठं बहुतमो भागो यस्य तस्मिन् वृद्धे इत्यर्थः। 'बहोर्लोपो भू च बहोः।' 'इष्ठस्य यिट् च।' बहुषु शरशयनेषु बाणमञ्चेषु आदौ सुप्तः पश्चादुत्थितः। शान्तनवं भीष्मम्। 'तस्यापत्यम्' इत्यण्। 'ओर्गुणः' इति शन्तनुशब्दस्योकारस्य गुणः। हसन् अतिशयानः। दुष्करोऽभिभवः अपमानः यस्य तादृशं शरीरं यस्य, तस्य भावः तत्ता तया। प्रकटितः प्रकाशितः प्रकम्पः वेपथुः यया तया जरया सारमयेषु सत्त्ववत्सु अवशिष्टेषु वा शिरोरुहेषु केशेषु धवलताव्याजेन स्पृष्टः। वार्धक्ये जनस्य कम्पो धवलकेशत्वं च दृश्येते। सितचामरेण श्वेतव्यजनेन। नाभौ लम्बते इति तेन नाभिं यावदधःप्रसारिणा कूर्चकलापेन श्मश्रुसमूहेन। परिणामेऽपि जरायामपि। धौता उज्ज्वला असिधारा खड्गधारा एव जलं तस्य पानाय तृषितैरिव पिपासितैरिवेत्युत्प्रेक्षा। विवृतवदनैः विस्तृतमुखैः। व्रणविदारैः क्षतविकासैः। विषमितं नतोन्नतं विशालं वक्षः उरः यस्य सः। सुभटानां सुयोधानाम्। समररसमानयन् रणोत्साहमुत्पादयन्। न क्वचित्कृताश्रयया सदैव चञ्चलया। विप्रलभ्यमानं प्रतार्यमाणम्। न चेतयन्ते न जानन्ति। तेजस्विनां प्रबलानां 'अस्मायामेधास्रजो विनिः।' तपस्वी वराकः। विप्रकृताः ब्राह्मणैः कृताः अभिचारा इव हिंसाफलकानि मारणोच्चाटनस्तम्भनप्रभृतीनि कर्माणि इव विप्रकृताः अपमानिताः मनस्विनः तेजस्विनः सद्योऽविलम्बेन सकलकुलप्रलयं सर्वकुलक्षयं उपहरन्ति कुर्वन्ति। अहितेन शत्रुणा हतः स्वजनः संबन्धी यस्य सः। द्विषतः शत्रोः योषितां स्त्रीणां उरस्ताडनेन वक्षस्ताडनेन शत्रुवधेनेत्यर्थः। पतिवधे हि स्त्रियः स्वोरस्ताडनं कुर्वन्ति। विपक्षवनितानां शत्रुस्त्रीणां चक्षुषा जलं ददाति शत्रुं हत्वा तत्स्त्रीणां बाष्पाञ्जलिभिः हतं स्वजनं तर्पय-

शरीरेषु निबध्नन्ति बन्धुबुद्धिं प्रबुध्दाः। स्थायिनि यशसि शरीरधीर्वीराणाम्। स त्वं सत्त्ववतामग्रणीः प्राग्रहरः प्राज्ञानाम्, प्रथमः समर्थानाम्, प्रष्ठोऽभिजातानाम्, अग्रेसरस्तेजस्विनामादिरसहिष्णूनाम्। एताश्च स्वायत्ताः सुभटानामुरःकवाटभित्तयः। किं **गौडाधिपेनैकेन**। तथा कुरु यथा नान्योऽपि कश्चिदाचरत्येवं भूयः। तदद्यैव कृतप्रतिज्ञो गृहाण **गौडाधम**जीवितध्वस्तये धनुः। न ह्ययमरातिरक्तचन्दनचर्चाशिशिरोपचारमन्तरेण शाम्यति परिभवानलपच्यमानदेहस्य देवस्य दुःखदाहज्वरः सुदारुणः।' इत्युक्त्वा व्यरंसीत्।

देवस्तु **हर्षस्तं** प्रत्यवादीत्–'करणीयमेवेदमभिहितं मान्येन। श्रूयतां मे प्रतिज्ञा। शपाम्यार्यस्यैव पादपांशुस्पर्शेन यदि परिगणितैरेव वासरैर्निर्गौडां न करोमि मेदिनीं ततस्तनूनपाति पीतसर्पिषि पतङ्ग इव पातकी पातयाम्यात्मानम्।' इत्युक्त्वा च महासन्धिविग्रहाधिकृत**मवन्ति**मन्तिकस्थमादिदेश। 'लिख्यतां सर्वेषां राज्ञां– सज्जीक्रियन्तां कराः करदानाय शस्त्रग्रहणाय वा, गृह्यन्तां दिशश्चामराणि वा, नमन्तु शिरांसि धनूंषि वा, कर्णपूरीक्रियन्तामाज्ञा मौर्व्यो वा, शेखरीभवन्तु पादरजांसि शिरस्त्राणि वा, घट-

---

तीत्यर्थः। स्वप्ने आदौ दृष्टानि पश्चान्नष्टानि। प्रबुद्धाः पण्डिताः जागरिताश्च। स्थायिनि स्थिरे। शरीरधीः देहबुद्धिः। वीराः स्थिरं स्वयश एव देहं मन्यन्ते। 'प्रष्ठोऽग्रगामिनि' इति सूत्रेण प्रष्ठशब्दो निपात्यते। गौडाधमस्य जीवितस्य आयुषो ध्वस्तये विनाशाय अरातेः शत्रोः रक्तं असृक् एव चन्दनं मलयजं तस्य चर्चा लेपनं सा एव शिशिरोपचारः शीतलोपायस्तमन्तरेण तं विना। परिभवः अपमान एव अनलो वह्निस्तेन पच्यमानो दह्यमानो दाहो यस्य तस्य। व्यरंसीत् स्वभाषणं समाप्तवान् विपूर्वाद्रमधातोर्लुङ्। 'व्याङ्परिभ्यो रमः' इति परस्मैपदम्। **देव इति**। पादपांशुस्पर्शेन पदधूलिस्पर्शेन। परिगणितैः अल्पैः। निर्गौडां गौडाधिपरहिताम्। तन्वा ऊनं कृशं पातीति तनूनपं घृतादि तदत्तीति तनूनपात् अग्निः 'जातवेदास्तनूनपात्' इत्यमरः। पतङ्ग इव शलभ इव 'पतङ्गः शलभे शालिप्रभेदे पक्षिसूर्ययोः' इति मेदिनी। महान् सन्धौ नृपमैत्रीकरणे विग्रहे युद्धे चाधिकृतो नियुक्तो मन्त्री तम्। सर्वेषां राज्ञां सर्वेभ्यो राजभ्यः, शेषे षष्ठी। करा हस्ताः। करदानाय राजग्राह्यं भागं वितरितुं मदाधिपत्यं स्वीकर्तुमित्यर्थः। शस्त्रग्रहणाय सज्जीक्रियन्तां युद्धं कर्तुं वा संनद्धा भवतेति भावः। 'बलिहस्तांशवः कराः' इत्यमरः। दिशो गृह्यन्तां स्वराज्यं परित्यज्य दिक्षु पलायध्वं, चामराणि गृह्यन्तां वा मम चामरग्राहिणः सेवका वा भवतेत्यर्थः। एवमग्रेऽपि। आज्ञाः कर्णपूरीक्रियन्तां कुण्डलवत्स्वकर्णे क्रियन्ताम्। मौर्व्यो वा धनुर्ज्या वा

न्ताम‍ञ्जलयः करिघटाबन्धा वा, मुच्यन्तां भूमय इषवो वा, समालम्ब्यन्तां वेत्रयष्टयः कुन्तयष्टयो वा, सुदृष्टः क्रियतामात्मा मच्चरणनखेषु कृपाणदर्पणेषु वा' इति । कृतनिश्चयश्च मुक्तास्थानो विसर्जितराजलोकः स्नानारम्भाकाङ्क्षी सभामत्याक्षीत् । उत्थाय च स्वस्थवन्निःशेषमाह्निकमकार्षीत् । अगलच्च दर्पप्रसर इव श्रुतप्रतिज्ञस्य शाम्यदूष्मा दिवसस्त्रिभुवनस्य ।

इति हर्षचरितसारे राजप्रतिज्ञावर्णनं नाम तृतीय उच्छ्वासः ।

आकर्णान्तं आकृष्यन्ताम् । शेखरीभवन्तु पादरजांसि नमस्कारे मच्चरणधूलिर्युष्माकं शिरोभूषणं भवतु । घटन्तां बध्यन्ताम् । करिघटाबन्धा गजसमूहाः । समालम्ब्यन्तां वेत्रयष्टयो मत्प्रतीहारा भवतेत्यर्थः । कुन्तयष्टयः प्रासाख्यान्यायुधानि वा समालम्ब्यन्तां गृह्यन्तां युद्धायेति भावः । आत्मा स्वरूपं मच्चरणनखेषु सुदृष्टः क्रियतां मत्पादवन्दने उज्ज्वलेषु मत्पादनखेषु प्रतिबिम्बितमात्मरूपं पश्यतेति भावः । कृपाणदर्पणेषु स्वासिमुकुरेषु वात्मरूपं दृश्यतां युद्धार्थं कृपाणा गृह्यन्तामिति भावः । अत्याक्षीत् त्यजधातोर्लुङ् । मुक्तमास्थानं सभागृहं येन सः । आह्निकं अहनि कर्तव्यं संध्यादिकर्म । 'कालाट्ठञ्' । श्रुता प्रतिज्ञा येन तस्य त्रिभुवनस्य जगत्त्रयस्य दर्पप्रसर इव गर्वाटोप इव । शाम्यन् ऊष्मा औष्ण्यं यस्य तादृशो दिवसोऽगलत् अन्तं जगाम ।

इति हर्षचरितसारे राजप्रतिज्ञावर्णनं नाम तृतीय उच्छ्वासः ।

चतुर्थ उच्छ्वासः ।

अङ्गनवेदी वसुधा कुल्या जलधिः स्थली च पातालम् ।
वल्मीकश्च सुमेरुः कृतप्रतिज्ञस्य वीरस्य ॥

अथ व्यतीतेषु केषुचिद्दिवसेषु, मौहूर्तिकमण्डलेन शतशः सुगणिते सुप्रशस्तेऽहनि दत्ते चतसृणामपि दिशां विजययोग्ये दण्डयात्रालग्ने, सलिलमोक्षविशारदैः शारदैरिवाम्भोधरैः कालधौतैः शातकौम्भैश्च कुम्भैः स्नात्वा विरचय्य परमया भक्त्या भगवतो नीललोहितस्यार्चामुदर्चिषं हुत्वा प्रदक्षिणावर्तशिखाकलापमाशुशुक्षणिं, दत्वा द्विजेभ्यो रत्नवन्ति राजतानि जातरूपमयानि च सहस्रशस्तिलपात्राणि कनकपत्रलतालंकृतशफशृङ्गशिखरा गाश्चार्बुदशः, समुपविश्य विततव्याघ्रचर्मणि भद्रासने विलिप्य प्रथमविलिप्तायुधो

ननु भ्रातृवधशोकान्मोहाद्वा हर्षेणेदृशी प्रतिज्ञा कृता । कथं नाम स गिरिगुहादौ पलायितं तीर्णसमुद्रं वा रिपुं जेतुं प्रभवेदित्याशङ्कां निरसितुमाह **अङ्गनवेदीति** । कृतप्रतिज्ञस्य वीरस्य वसुधा पृथ्वी अंगने अजिरे वेदिः होमद्रव्यासादनार्थं संस्कृता भूमिः 'वेदिः परिष्कृता भूमिः' इत्यमरः । प्राङ्गणवेदिवत्सुखेनाक्रमितुं शक्येत्यर्थः । श्लेषाभासालंकारः । एवमग्रेऽपि । जलधिः समुद्रः कुल्या कृत्रिमाल्पनदी । तद्वत्सुलङ्घ्य इति भावः । पातालं स्थली अकृत्रिमभूः । 'जानपदकुण्डगोण–' इत्यादिनाऽकृत्रिमार्थे ङीष् । सुमेरुश्च वल्मीकः पिपीलिकाकृतमृत्पुञ्जः । तद्वदनायासेनारोढुं शक्य इत्यर्थः । **अथेति** । व्यतीतेषु गतेषु । मुहूर्तं विदन्ति इति मौहूर्तिकाः कार्तान्तिकाः । तेषां मण्डलं समूहः । दण्डयात्रायाः सेनाप्रयाणस्य लग्ने राश्युदये । सलिलस्य जलस्य मोक्षः पातः तत्र विशारदैः निपुणैः, मेघपक्षे सलिलमोक्षेण विशारदैः शुक्लैः । शरदि भवैः शारदैः । 'तत्र भवः' इत्यण् । अम्भोधरैः मेघैः । कलधौतस्य रजतस्य विकारैः कालधौतैः 'तस्य विकारः' इत्यण् । शतकुम्भे पर्वते भवं शातकौम्भं सुवर्णम् । अनुशतिकादित्वादुभयपदवृद्धिः । तद्विकारैः सौवर्णैरित्यर्थः नीलश्चासौ लोहितश्च (कण्ठे जटासु च) नीललोहितः शिवः । तस्य अर्चां पूजाम् । उद्गता अर्चिः कान्तिः यस्य तम् । प्रदक्षिण आवर्तो भ्रमणं यस्य तादृशः शिखाकलापो ज्वालासमूहो यस्य तम् । आशु शीघ्रं शु (शोभनं) क्षणोतीति अग्निः । प्रशस्तं जातं जातरूपम् सुवर्णम् । 'प्रशंसायां रूपम्' । जातरूपमयानि सौवर्णानि । विकारार्थे मयट् । कनकस्य सुवर्णस्य पत्रलताभिः भूषणविशेषैः अलंकृतानि शफाः खुराः शृंगाणां विषाणानां शिखराणि अग्रभागाश्च येषाम् । अर्बुदं अर्बुदं अर्बुदशः । 'संख्यैकवचनाच्च वीप्सायाम्' इति वीप्सार्थे

निजयशोधवलेनाचरणतश्चन्दनेन शरीरम्, परिधाय राजहंसमिथुनलक्ष्मणी सदृशे दुकूले, परमेश्वरचिह्नभूतां शशिकलामिव कल्पयित्वा सितकुसुममुण्डमालिकां शिरसि, नीत्वा कर्णाभरणमरकतमयूखमिव कर्णगोचरतां गोरोचनाच्छुरितमभिनवं दूर्वापल्लवम्, विन्यस्य सह शासनवलयेन गमनमङ्गलप्रतिसरं प्रकोष्ठे, परिपूजितप्रहृष्टपुरोहितकरप्रकीर्यमाणशान्तिसलिलसीकरनिकराभ्युक्षितशिराः प्रमुदितप्रजाजन्यमानजयशब्दकोलाहलो भवनान्निर्जगाम।

नातिदूरे च नगरादुपसरस्वति निर्मिते महति तृणमये समुत्तम्भिततुङ्गतोरणे, वेदीविनिहितपल्लवललामहेमकलशे बद्धवनमालादाम्नि धवलध्वजमालिनि भ्रमच्छुक्लवाससि, पठद्विजन्मनि मन्दिरे प्रस्थानमकरोत्। तत्रस्थस्य चास्य ग्रामाक्षपटलिकः सकलकरणिपरिकरः 'करोतु देवो दिवसग्रहणमद्यैवावन्ध्यशासनः शासनानाम्' इत्यभिधाय वृषाङ्कामभिनवघटितां हाटकमयीं मुद्रामुपनिन्ये। जग्राह च तां राजा। समुपस्थापिते च प्रथमत एव मृत्पिण्डे परिभ्रश्य करकमलादधोमुखी महीतले पपात मुद्रा। मन्दाश्यानपङ्कपटले मृदुमृदि **सरस्वती**तीरे स्फुटं व्यराजन्त राजयो वर्णानाम्। अमङ्गला-

---

'शस्'प्रत्ययः। गाः धेनूः। भद्रासने रत्नादिनिर्मिते नृपासने। निजयशः स्वकीर्तिः तद्वत् धवलेन शुभ्रेण, यशसः शुभ्रवर्णस्य कविसमयसिद्धत्वात्। आ चरणतः पादावभिव्याप्य 'पञ्चम्यपाङ्परिभिः' इति पञ्चम्यर्थे तसिः। परिधाय प्रावृत्य। राजहंसयोः मिथुनं युग्मं तत् लक्ष्म लाञ्छनं ययोस्ते। परमेश्वरस्य शिवस्य पक्षे सम्राजश्च। सितकुसुमानि श्वेतपुष्पाणि तद्वत् मुण्डानि कपालानि तेषां मालिकाम् नृपपक्षे सितकुसुमानां मुण्डमालिकां ललाटमालाम्। कर्णाभरणस्य श्रोत्रभूषणस्य मरकतस्य हरिद्रत्नविशेषस्य मयूखं किरणम्। गोरोचनया गन्धद्रव्यविशेषेण छुरितं संमिश्रम्। अभिनवं नूतनम्। शासनवलयं मुद्राकटकम्। मङ्गलप्रतिसरं मङ्गलकङ्कणम्। 'भवेत्प्रतिसरो मन्त्रभेदे माल्ये च कङ्कणे' इति मेदिनी। **नातीति**। सरस्वत्याः समीपे उपसरस्वति 'अव्ययं विभक्तिसमीप-' इत्यादिना सामीप्यार्थेऽव्ययीभावः। समुत्तम्भितानि ऊर्ध्वीकृतानि तुङ्गानि उन्नतानि तोरणानि बहिर्द्वाराणि यस्मिन्। वेद्यां संस्कृतभूमौ विनिहिताः पल्लवललामाः पर्णलाञ्छनाः हेमकलशाः सुवर्णकुम्भा यस्मिन्। पठन्तो द्विजन्मानो ब्राह्मणा यस्मिन्। अक्षाणां आयव्ययचिन्तानां पटले अधिकरणे नियुक्तः आक्षपटलिकः। 'तत्र नियुक्तः' इति ठक्। शासनानां आज्ञानां दिवसग्रहणं करोतु मङ्गलदिने आरम्भं करोतु। वृषाङ्कां वृषभलाञ्छनाम्। हाटकमयीं सुवर्णमयीम्। मन्दं ईषत् आश्यानं शुष्कं पङ्कपटलं पङ्कसमूहः यस्मिन् तादृशे। मृदुः कठिनेतरा

PUBLIC LIBRARY 1939 ALLAHABAD U.P.

शङ्किनि च विषीदति परिजने नरपतिरकरोन्मनस्येतत् । 'अतत्त्वदर्शिन्यो हि भवन्त्यविदग्धानां धियः । तथा हि—एकशासनमुद्राङ्का भूर्भवतो भविष्यतीति निवेदितमपि निमित्तेनान्यथा गृह्णन्ति ग्राम्याः' । इत्यभिनन्द्य मनसा महानिमित्तं, तत्सीरसहस्रसंमितसीम्नां ग्रामाणां शतमदाद्द्विजेभ्यः । निनाय च तत्र तं दिवसम् । प्रतिपन्नायां शर्वर्यां संमानितसर्वराजलोकः सुष्वाप ।

अथ गलति तृतीये यामे सुप्तसमस्तसत्त्वनिःशब्दे दिक्कुञ्जरजृम्भमाणगम्भीरध्वनिरताडयत प्रयाणपटहः । अग्रतः स्थित्वा च मुहूर्तमिव पुनः प्रयाणक्रोशसंख्यापकाः स्पष्टमष्टावदीयन्त प्रहाराः पटहे पटीयांसः ।

उदिते च भगवति दिनकृति राज्ञः समायोगग्रहणसमयशंसी सस्वान संज्ञाशङ्खो मुहुर्मुहुः । अथ नचिरादिव प्रथमप्रयाण एव दिग्विजयाय दिग्गजसमागममिव गमनविलोलकर्णतालदोलाविलासैः कुर्वाणया करेणुकयोह्यमानः, वैदूर्यदण्डविकटेनोपरि प्रत्युप्तपद्मरागखण्डखचिततया सूर्योदयदर्शनकोपादिव लोहितायता ध्रियमाणेन मङ्गलातपत्रेण, कदलीगर्भाभ्यधिकम्रदिम्ना नवनेत्रनिर्मितेनाङ्गलग्नेन कञ्चुकेनामृतमथनदिवस इव क्षीरोदफेनपटलधवलाम्बरवाही

मृद् मृत्तिका यस्मिन् तस्मिन् । वर्णानां राजयः अक्षरपङ्क्तयः । अमङ्गलं मुद्रापतनादशुभं आशङ्कते इति तस्मिन् । विषीदति खिद्यति । तत्त्वं यथार्थस्वरूपं न पश्यन्तीति अतत्त्वदर्शिन्यः । एकं अद्वितीयं शासनं आज्ञा तस्य मुद्रा अङ्कः चिह्नं यस्याः सा । निमित्तेन मुद्रापतनरूपेण शकुनेन । ग्रामे भवाः ग्राम्याः । सीरसहस्रेण लाङ्गलसहस्रेण संमिता परिच्छिन्ना सीमा येषाम् । **अथेति** । दिक्कुञ्जस्येव दिग्गजस्येव जृम्भमाणः प्रसारी गम्भीरो मन्दो ध्वनिः शब्दो यस्य सः । प्रयाणस्य गमनस्य क्रोशानां संख्यापकाः निर्देशकाः । **उदित इति** । समायोगग्रहणं समवायीकरणं तस्य समयं वेलां शंसतीति 'समायोगस्तु संयोगे समवाये प्रयोजने' इति मेदिनी । नचिरात् सुप्सुपेति समासः । इव वाक्यालंकारे । गमने प्रयाणे विलोलयोश्चञ्चलयोः कर्णतालयोः दोलाविलासैः चालनक्रीडाभिः । करेणुकया हस्तिन्या । विदूरपर्वतात् प्रभवतीति वैदूर्यम् । 'विदूराञ्ञः' । रत्नविशेषः । तस्य दण्डेन विकटं सुन्दरं तेन । प्रत्युप्ताः निहिताः पद्मरागाणां रक्तवर्णरत्नविशेषाणां खण्डाः शकलानि तैः खचिततया संयुक्तत्वात् । लोहितं रक्तवर्णं भवति लोहितायति 'लोहितादिडाज्भ्यः क्यष्' इति भवत्यर्थे क्यष्, तेन आतपत्रेण छत्रेण 'इत्थंभूतलक्षणे' इति तृतीया । कदलीगर्भादभ्यधिको म्रदिमा मृदुत्वं यस्य तेन । 'पृथ्वादिभ्य इमनिज्वा' इति इमनिच् प्रत्ययः । नवेन नूतनेन नेत्रेण अंशुकेन निर्मितेन कृतेन । 'स्याज्जटांशुकयोर्नेत्रम्' इत्यमरः । क्षीरोदस्य क्षीरसमुद्रस्य फेनपटलं फेनपुञ्जः तद्वत् धवलाम्बरं श्वेतवस्त्रं वहतीति । दिवसपक्षे फेनपटलेन

कनकवेत्रलतालोकविक्षिप्यमाणं दिनमपि दूरीकुर्वद्भिरिव दण्डिभिरितस्ततः समुत्सार्यमाणजनसमूहो निर्जगाम नरपतिः। प्रणम्यमानश्च नेत्रत्रिभागैः कटाक्षैश्च समग्रेक्षितैर्भ्रूवीक्षितैश्चार्धस्मितैश्च परिहासैश्च छेकालापैश्च कुशलप्रश्नैश्च प्रतिप्रणामैश्चाज्ञादानैश्चाक्रीणन्निव मानमयान्प्राणान्प्रणयदानैः प्रवीराणां वीरो यथानुरूपं विबभाज राजकम्।

अथ प्रस्थिते राजनि कलकलत्रस्तदिङ्नागशूत्काररव इवेतस्ततस्तस्तार तारतरस्तूर्याणां प्रतिध्वनिराशातटेषु। त्रिप्रस्रुतानां करिणां मदप्रस्रवणवीथिभिरलिकुलकालीभिः कालिन्दीवेणिकासहस्राणीव सस्यन्दिरे। अश्वीयश्वासनिक्षिप्तैः शिश्विन्दे सिन्धुवारदामशुचिभिर्निरन्तरमन्तरिक्षं फेनपिण्डैः। चक्षुषामुन्मेषं मुमुषुस्तडिच्चञ्चलानि चूडामणीनामर्चींषि। स्वयमपि विसिष्मिये बलानां भूपालः सर्वतो विक्षिप्तचक्षुश्चाद्राक्षीदावासस्थानसकाशात्प्रतिष्ठमानं स्कन्धावारं **अर्जुन**बाहुदण्डसहस्रसंपिण्डितोन्मुक्तमिव सहस्रधा प्रवर्तमानं प्रवाहं **नर्मदायाः**। 'प्रसर तात, भाव किं विलम्बसे। त्वङ्गति तुरङ्गमः। भद्र

धवलमम्बरं आकाशं वहति इति विग्रहः। कनकवेत्रलतानां सुवर्णावृतवेतसयष्टीनामालोकेन प्रकाशेन विक्षिप्यमाणं प्रास्यमानम्। समुत्सार्यमाणः मार्गाद् दूरीक्रियमाणः जनसमूहो लोकसमूहो यस्य। नेत्रत्रिभागैरल्पेक्षणैः। कटाक्षैरपाङ्गावलोकनैः। भ्रूवीक्षितैर्भ्रूचलितैः। परिहासैर्नर्मभाषितैः। छेकालापैर्वक्रोक्तिभिः। प्रतिप्रणामैः प्रणामस्वीकारार्थं कृतैर्नमस्कारैः। प्रणयदानैः मानमयान् प्राणानाक्रीणन् प्रेमदर्शनेन मानिनस्तान् स्ववशीकुर्वन्नित्यर्थः। यथानुरूपं राजकं विबभाज यथायोग्यं नृपतीन् संमानयांचकारेत्यर्थः। **अथेति**। कलकलेन कोलाहलेन त्रस्तानां भीतानां दिङ्नागानां दिग्गजानां शूत्काररव इव भयसूचको ध्वनिरिव। तारतरः अत्युच्चः। प्रतिध्वनिः प्रतिशब्दः। आशातटेषु दिङ्मण्डलेषु। त्रिप्रस्रुतानां त्रिभ्यो गण्डनेत्रशुण्डाभ्यो मदं स्रवताम्। वीथिः मार्गः। अलिकुलैर्भ्रमरपुञ्जैः कालीभिः श्यामाभिः। कालिन्द्याः यमुनायाः वेणिकासहस्राणि प्रवाहसहस्राणि। कालिन्दीजलस्य कृष्णवर्णत्वादियमुत्प्रेक्षा। अश्वानां समूहः अश्वीयम् 'केशाश्वाभ्यां यच्छावन्यतरस्याम्' इति समूहार्थे छप्रत्ययः। शिश्विन्दे 'श्विदि श्वैत्ये' इति धातोर्लिट्। 'इदितो नुम् धातोः' इति नुम्। सिन्धुवाराणां श्वेतपुष्पविशेषाणां दामानि मालास्तद्वत् शुचिभिः श्वेतवर्णैः चक्षुषामुन्मेषं मुमुषुः—अतीवोज्ज्वलत्वाज्जनास्तानि द्रष्टुं नापारयन्निति भावः। विसिष्मिये चकितो बभूव। बलानां करणत्वाविवक्षायां षष्ठी। स्कन्धार्थं युद्धार्थं आवारः सैन्यनिवेशः तम्। अर्जुनस्य सहस्रार्जुनस्य बाहुदण्डसहस्रेण आदौ संपिण्डितं रुद्धं पश्चादुन्मुक्तम्। सहस्रधा सहस्रप्रकारैः 'संख्याया विधार्थे धा'। सैनिकानां तदनुसारिणां च प्रवर्तमानानेकाला-

भग्नचरण इव संचरसि यावदमी पुरःसरा सरभसमुपरि पतन्ति। वाहयसि किमुष्ट्रम्। न पश्यसि निर्दय शिशुं शयानम्। **सौरभेय,** सरणिमपहाय हय-मध्यं धावसि। अङ्ग गलतिं तिरश्चीना गोणी। गणयसि न मामारटन्तम्। **सौवीरक,** कुम्भो भग्नः। **मन्थरक,** खादिष्यसि गतः सन्निक्षुम्।' इत्येवमादिप्रवर्तमानानेकसंलापं वीक्षमाणः कटकं जगाम। आसन्नवर्तिनां च 'ह्सीय एवान्तरं **तुषारगिरिगन्धमादन**योः। उत्साहिनः किष्कुस्**तुरुष्क**विषयः प्रादेशः **पारसीक**देशः। शशपदं **शक**स्थानम्। अदृश्यमानप्रतिप्रहारे **पारियात्रे** यात्रैव शिथिला। शौर्यशुल्कः सुलभो **दक्षिणापथः**।' इत्येवंप्रायानुयोगद्योतकानामालापान्पार्थिवकुमाराणां बाहुशालिनां शृण्वन्नेवावासमासादावासम्। मन्दिरद्वारि च चोभयतः सबहुमानं भ्रूलताभ्यां विसर्जितराजलोकः प्रविश्य चावततार बाह्यास्थानमण्डपस्थापितमासनमाचक्राम। प्रास्तसमायोगश्च क्षणमासिष्ट।

अथ तत्र प्रतीहारः पृथ्वीपृष्ठप्रतिष्ठापितपाणिपल्लवो विज्ञापितवान्—देव **प्राग्ज्योतिषेश्वरेण कुमारेण** प्रहितो **हंसवेग**नामा दूतोऽन्तरङ्गस्तोरणमध्यास्ते। राजा तु 'तमाशु प्रवेशय' इति सादरमादिदेश। अनन्तरं **हंसवेगः** प्रभूतप्राभृतभृतां पुरुषाणां समूहेन महतानुगम्यमानः सविनयं प्रविवेश राजमन्दिरम्। आरादेव च पञ्चाङ्गालिङ्गिताङ्गनः प्रणाममकरोत्। 'एह्येहि' इति सबहुमानमाहूतश्च प्रधावितोपसृतः पादपीठलुठितललाटलेखो न्यस्तहस्तः

पानाह **प्रसरेति**। त्वङ्गति गच्छति। सुरभेरपत्यं पुमान् सौरभेयः 'स्त्रीभ्यो ढक्' इयं कस्यचिच्चाटूक्तिः। खादिष्यसीति—मार्गे इक्षुखादनेन विलम्बं मा कुर्वित्यर्थः। ह्सीयः अल्पतरम्। 'स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः' इति ईयस्प्रत्यये परे 'व' शब्दस्य लोपः। उत्साहिनः उत्साहवन्तं वीरं प्रति। 'किष्कुर्हस्ते वितस्तौ च' इत्यमरः। साङ्गुष्ठया प्रदेशिन्या प्रादेशः। 'प्रादेशतालगोकर्णास्तर्जन्यादियुते तते' इत्यमरः। शशानां पदं स्थानम् शशस्थानवत् सुजय्यमित्यर्थः। प्रतिप्रहारः प्रतिकूलः प्रहारः। यात्रा सैन्यप्रयाणम्। शौर्यं एव शुल्कं मूल्यं यस्य सः। प्रास्तः विसर्जितः समायोगः जनसमूहो येन सः। **अथेति**। प्राग्ज्योतिषाणां कामरूपाणां ईश्वरेण नृपेण। अन्तरङ्गः आत्मीयः विश्वासार्ह इत्यर्थः। प्रभूतानि बहूनि प्राभृतानि उपायनानि बिभ्रतीति तेषाम्। पञ्चभिः अङ्गैः हस्तपादमूर्धभिः आलिङ्गितं स्पृष्टं अङ्गनं चत्वरं येन। **पादपीठे** पादस्थापनासने लुठिता संघृष्टा ललाटलेखो येन स। पार्थिवेन हर्षेण

पृष्ठे पार्थिवेनोपसृत्य नमश्चक्रे। स्निग्धनरेन्द्रदृष्ट्या निर्दिष्टमविप्रकृष्टं स प्रदेशमध्यास्त। ततो राजा तिरश्चीं तनुमीषदिव दधानश्चामरग्राहिणीमन्तरालवर्तिनीं समुत्सार्य, संमुखीनः सप्रश्रयं पप्रच्छ– '**हंसवेग**, श्रीमान् कच्चित्कुशली **कुमारः**' इति। स तमवादीत्–'अद्य कुशली येनैवं स्नेहस्नपितया सौहार्दद्रवार्द्रया सगौरवं गिरा पृच्छति देवः' इति।

स्थित्वा च मुहूर्तमिव पुनः स चतुरमुवाच। चतुरम्भोधिभोगभूतिभाजनभूतस्य देवस्य सद्भावगर्भमपहाय हृदयमेकमन्यदनुरूपं प्राभृतमेव दुर्लभं लोके, तथाप्यस्मत्स्वामिना संदेशमशून्यतां नयता पूर्वजोपार्जितं वारुणातपत्र**माभोगा**ख्यमनुरूपस्थानन्यासेन कृतार्थीकृतमेतत्। अस्य च कुतूहलकृन्ति बहून्याश्चर्याणि दृश्यन्ते। प्रतिदिवसं प्रविशति शैत्यहेतोश्छायायाः किरणसहस्रादेकैकः सोमस्य रश्मिरस्मिन्। अस्मिन् प्रविष्टे प्रध्यानानन्तरं स्रवन्ति दन्तवीणोपदेशाचार्याश्च्योतन्ति चन्द्रभासामम्भसां मणिशलाकाभ्यो यावदिच्छमच्छा धाराः। प्रचेता इव यश्चतुर्णामर्णवानामधिपतिर्भूतो भावी वा तमनुगृह्णाति छायया नेतरम्। एतत्तावदनुगृह्णातु दृशा देवः संदेशमपि विस्रब्धं श्रोष्यति।' इत्येवमभिधाय विवृत्यात्मीयं पुरुषमभ्यधात् 'उत्तिष्ठ, दर्शय देवस्य' इति।

स वचनानन्तरमुत्थाय पुमानूर्ध्वीचकार तद्धौतदुकूलकल्पिताच्च निचोलकादकोषीत्। चित्रीयमाणचेताश्च सराजको राजा दण्डानुसाराधिरोहिण्या दृष्ट्या

पृष्ठे न्यस्तः स्थापितो हस्तो यस्य। नमश्चक्रे नमस्कृतवान्। कर्तरि लिट्। अविप्रकृष्टं अदूरम्। प्रदेशमध्यास्त 'अधिशीङ्स्थासां कर्म।' तिरश्चीं तनुं दधानः पार्श्ववर्तिनीं चामरग्राहिणीं वक्तुं स्वदेहं किंचित्परिवर्तयन्नित्यर्थः। संमुखीनोऽभिमुखं निषण्णः सप्रश्रयं सविनयम्। स्नेहेन प्रेम्णा स्नापितया क्लिन्नया। सुहृदो भावः सौहार्दं मित्रप्रेम तस्य द्रवस्तेनार्द्रया गिरा वाचा। **स्थित्वेति**। चतुर्णामम्भोधीनां समुद्राणां भोगस्य पालनस्य भूतेः सम्पत्तेश्च भाजनं पात्रं भूतस्य सह सुपेति समासः। सद्भावः शोभनाशयो गर्भे यस्य तादृशम्। अशून्यतां नयता पूरयतेत्यर्थः। कृतार्थं सफलं कृतम् 'अभूततद्भावे च्विः।' कुतूहलकृन्ति आश्चर्यकारीणि। शैत्यहेतोः शीतलत्वार्थम्। 'षष्ठी हेतुप्रयोगे'। सोमस्य चन्द्रस्य। रश्मिः किरणः। दन्तानां वीणा शैत्येन परस्परघर्षणं तस्योपदेशाचार्याः तत्कारका इत्यर्थः। चन्द्रस्येव भाः कान्तिर्येषां, शुभ्रवर्णानामित्यर्थः। प्रचेता वरुणः 'प्रचेता वरुणः पाशी' इत्यमरः। छाययानुगृह्णन्ति छायां कुर्वन्ति। विस्रब्धं सविस्रम्भम्। अभ्यधात् उवाच कर्तरि लुङ्। **स इति**। आश्चर्यवाचकात् चित्रङ्शब्दात् 'नमोवरिव-

सादरमैक्षिष्ट तत्तिलकमिव त्रिभुवनस्य, श्लिष्टाभिर्मानसबिसतन्तुमयीभिश्चामरिकावलीभिर्विरचितपरिवेशम्, उपरि चक्रवर्तिलक्ष्मीनूपुरस्वनश्रवणदोहदनिश्चलेनेवं लक्ष्मणा विततपत्रेण हंसेन सनाथीकृतशिखरम्, स्पर्शवता च प्रभावस्तम्भितेन मन्दाकिनीमृणालेन, मुकुलितफणेन वासुकिनेव नीतेन दण्डतां द्योतमानं त्रैलोक्याद्भुतं महच्छत्रम् ।

दृष्टे च तस्मिन् राज्ञा प्रथमं शेषमपि प्राभृतं प्रकाशयांचक्रुः क्रमेण कार्माः । राजा तु छत्रदर्शनात्प्रहृष्टहृदयः प्रथमप्रयाणे शोभननिमित्तमिति मनसा जग्राह । **हंसवेगं** च प्रीयमाणो बभाषे 'भद्र सकलरत्नधाम्नः परमेश्वरशिरोधारणार्हस्यास्य महातपत्रस्य महार्णवादिव कुमुदबान्धवस्य **कुमारा**ल्लाभो न विस्मयाय' इति । अपनीते च तस्मात्प्रदेशात्प्राभृतसंभारे क्षणमिव स्थित्वा '**हंसवेग,** विश्रम्यताम्' इति प्रतीहारभवनं विसर्जयांबभूव । स्वयमप्युत्थाय स्नात्वा मङ्गलाकाङ्क्षी प्राङ्मुखः प्राविशदाभोगस्य छायाम् ।

अथ विशत एवास्य छायाजन्मना जडिम्ना चूडामणितामनीयतेव शशिबिम्बम्, कर्पूररेणव इव व्यलीयन्त लोचनयुगले, अन्तर्हितहिमशिलेव विलीयमाना व्यलिम्पदङ्गानि । जातविस्मयश्चाकरोन्मनसि 'एकमजर्यं संगतमपहाय कास्त्यन्या प्रतिकौशलिका' इति । आहारकाले च **हंसवेगाय**

श्चित्रङः क्यच्' इति क्यजन्तात् ङित्वादात्मनेपदे शानच् । 'आने मुक्' । चित्रीयमाणं साश्चर्यं चेतो यस्य सः । दण्डानुसारेण दण्डक्रमेण अधिरोहति ऊर्ध्वं गच्छतीति तया । ऐक्षिष्ट ईक्षतेर्लेङ् । श्लिष्टाभिर्लग्नाभिः मानसस्य सरोविशेषस्य बिसतन्तुमयीभिः मृणालतन्तुनिर्मिताभिः । विरचितः परिवेशः परिधिः यस्य । चक्रवर्तिनः सम्राजः लक्ष्म्याः राज्यश्रियः नूपुरस्य पादभूषणस्य स्वनस्य ध्वनेः श्रवणस्य दोहदः अभिलाषस्तेन निश्चलेनेव निष्कम्पेनेवेत्युत्प्रेक्षा । सनाथीकृतं संयुक्तं शिखरमग्रभागो यस्य । स्पर्शवता सुखस्पर्शेन प्रशंसायां मतुप् । प्रभावेण सामर्थ्येन स्तम्भितेन दृढीकृतेन वासुकिपक्षे मन्त्रादिभिः निश्चलीकृतेन । दण्डतां नीतेन दण्डीकृतेन । **दृष्ट इति** । कार्माः कर्मशीलाः 'कार्मस्ताच्छील्ये' इति टिलोपेन निपातः । शोभनं मङ्गलं निमित्तं शकुनः । परमेश्वरेण चक्रवर्तिना चन्द्रपक्षे शंकरेण च शिरसि धारणार्हस्य धारयितुं योग्यस्य । कुमुदानां रात्रिविकासिकमलानां बान्धवस्य सुहृदः चन्द्रमसः, तदुदये तेषां विकासादिति भावः । प्रतीहारस्य द्वारपालस्य भवनं गृहम् । आभोगस्य तन्नाम्नः छत्रस्य । **अथेति** । छायाजन्मना छायाकृतेन जडिम्ना मन्दतया । शशिबिम्बं चूडामणितामनीयतेव शिरसि निहितमिव, तादृशीं नितान्तशिशिरतां सोऽनुबभूव । न जीर्यतीति अजर्यं अनश्वरम् 'अजर्यं सङ्गतम्' इति सूत्रेण

धवलकर्पटप्रावृतधौतनालिकेरपरिगृहीतं विलिप्तशेषं चन्दनम्, अङ्गस्पृष्टे च वाससी, अतिमहार्हपद्मरागालोकलोहितीकृतदिवसं तरङ्गकं नाम कर्णाभरणं प्रभूतं च भोज्यजातं प्राहिणोत्। एवंप्रायेण च क्रमेण जगाम दिवसः।

अथ विहायस्तलमारूढे रोहिणीरमणे विततवितानतलवर्ती नरेन्द्रो 'यात तावत्' इति विसर्ज्यानुजीविनो **हंसवेग**मादिष्टवान् 'कथय सन्देशम्' इति। प्रणम्य स कथयितुं प्रास्तावीत्। देव पुरा **महावराह**सम्पर्कसम्भृतगर्भया भगवत्या भुवा **नरको** नाम सूनुरसावि रसातले। वीरस्य यस्याभवन् बाल्य एव पादप्रणामप्रणयिनश्चूडामणयो लोकपालानाम्। यश्च वरुणस्य बहिर्वृत्ति हृदयमिदमातपत्रमहार्षीत्। महात्मनस्तस्यान्वये **भगदत्त-पुष्पदत्तवज्रदत्त**प्रभृतिषु व्यतीतेषु बहुषु मेरूपमेषु महत्सु महीपालेषु प्रपौत्रो महाराजभू**तिवर्मणः**, पौत्र**श्चन्द्रमुखवर्मणः**, पुत्रो देवस्य कैलासस्थिरस्थितेः **स्थितिवर्मणः**, **सुस्थिरवर्मा** नाम महाराजाधिराजो जज्ञे तेजसां राशि**र्मृगाङ्क** इति यं जना जगुः। तस्य च सुगृहीतनाम्नो देवस्य देव्यां **श्यामादेव्यां** भास्करद्युति**र्भास्करवर्मा**परनामा तनयः समभवत्। अयमस्य शैशवादारभ्य संकल्पः स्थेयान् स्थाणुपादारविन्दद्वयादृते नाहमन्यं नमस्कुर्यामिति। ईदृशश्चायं मनोरथस्त्रिभुवनदुर्लभस्त्रयाणामन्यतमेन संपद्यते सकलभुवनविजयेन वा मृत्युना वा यदि वा जगत्येकवीरेण देवोपमेन मित्रेण। मैत्री च प्रायः कार्यव्यपेक्षिणी क्षोणीभृताम् कार्यं च कीदृशं नाम भवेद्यदुप-

---

निपातः। संगतं मैत्री। प्रतिकौशलिका प्रत्युपायनम्। धवलकर्पटेन श्वेतवस्त्रेण प्रावृते छन्ने धौते उज्ज्वले नालिकेरे तत्कृतसमुद्गके परिगृहीतं निहितं विलिप्तशेषं स्वाङ्गविलेपनादवशिष्टम्। अतिमहार्हाणां बहुमूल्यानां पद्मरागाणां आलोकेन प्रकाशेन लोहितीकृतो रक्तीकृतो दिवसो येन तादृशं कर्णाभरणं कुण्डलम्। **अथ विहायस्तलेति**। विसर्ज्य गन्तुमनुज्ञाय। असावि सूतः 'षूञ् प्राणिगर्भविमोचने' इति धातोः कर्मणि लुङ्। पादयोः प्रणामे नमस्कारे प्रणयः प्रीतिरस्ति एषामिति। बहिर्वृत्ति शरीराद्बहिर्वर्तमानं हृदयं तद्वत्प्रियमित्यर्थः। भास्करस्येव सूर्यस्येव द्युतिः कान्तिर्यस्य। शिशोर्भावः शैशवं बाल्यम्। स्थेयान् दृढतरः 'प्रियस्थिरस्फिरोरु–' इति सूत्रेण ईयसुप्रत्यये परतः स्थिरस्य 'स्थ' आदेशः। स्थाणोः शिवस्य पादारविन्दात् पादकमलादृते विना। 'स्थाणुः कीले हरे पुमान्' इति मेदिनी। 'अन्यारादितरर्ते–' इति पञ्चमी। एकवीरेण अनुपमशूरेण देवोपमेन हर्षसदृशेन। कार्यं प्रयोजनं व्यपेक्षतेऽवलम्बते इति। उपन्यस्यमानं निर्दिश्यमानम्। संचिचीषतः संचयं कर्तुमिच्छतः।

न्यस्यमानमुपनयेन्मित्रतां देवम्। देवस्य हि यशांसि संचिचीषतो बहिरङ्गभूतानि धनानि। बाह्वेव च केवले निषण्णस्य शेषावयवानामपि साहाय्यकसंपादनमनोरथो निरवकाशः किमुत बाह्यजनस्य। एवमघटमानसकलोपायसंपादितपदार्थेऽस्मिन् प्रार्थनामात्रमेव केवलमनुरुध्यमानः शृणोतु देवः। प्राग्ज्योतिषेश्वरो हि देवेन, धनञ्जय इव पुष्कराक्षेण, अजर्यं संगतमिच्छति। यदि देवस्यापि मैत्रीयति हृदयमवगच्छति च पर्यायान्तरितं दास्यमनुतिष्ठन्ति सुहृद इति ततः किमास्यते समाज्ञाप्यतामनुभवतु गाढोपगूढानि देवस्य कामरूपाधिपतिः। नाभिनन्दति चेद्देवः प्रणयमाज्ञापयतु किं कथनीयं मया स्वामिनः' इति

विरतवचसि तस्मिन् भूपालः पूर्वोपलब्धैरेव गुरुभिर्गुणैरारोपितबहुमानः कुमारे सुदूरमाभोगव्यतिकरेण तु परां कोटिमारोपिते प्रेम्णि लज्जमान इव सादरं जगाद– हंसवेग, कथमिव तादृशि महात्मनि महाभिजने गुणिनां प्राग्रहरे परोक्षसुहृदि स्निह्यति, मद्विधस्यान्यथा स्वप्नेऽपि प्रवर्तेत मनः। सकलजगदुत्तापनपटवोऽपि शिशिरायन्ते त्रिभुवननयनानन्दकरे कमलाकरे करास्तिग्मतेजसः। सुबहुगुणगणक्रीताश्च के वयं संख्यस्य। श्रेयांश्च संकल्पः कुमारस्य। स्वयं बाहुशाली मयि च समालम्बितशरासने सुहृदि हरादृते कमन्यं नमस्यति। संवर्धिता मे प्रीतिरमुना संकल्पेन। तत्तथा यतेथाः, यथा न चिरमियमस्मान् क्लेशयति कुमारदर्शनोत्कण्ठा।

हंसवेगस्तु विज्ञापयांबभूव–'अभिजातमभिहितं देवेन। तदेवमभि-

संपूर्वात् चिञ्धातोः सन्नन्ताच्छतृप्रत्ययः। बहिरङ्गभूतानि अनात्मीयानि। बाह्वेव केवले निषण्णस्य स्वभुजसामर्थ्येनैव सर्वमीहितं संपादयतः। घटमानैः प्रयुज्यमानैः सकलोपायैः संपादितः कृतः पदार्थः श्रीहर्षमैत्रीरूपस्तादृशो न भवतीति तस्मिन्। अनुरुध्यमानः अभ्यर्थ्यमानः। धनञ्जयः अर्जुनः। पुष्कराक्षेण श्रीकृष्णेन। मैत्रीयति मैत्रीमात्मन इच्छति 'सुप आत्मनः क्यच्' इति क्यच्। पर्यायेण अभिधानान्तरेण अन्तरितं निगूढम्। गाढानि अतिदृढानि उपगूढानि आलिङ्गनानि। 'स्वामिनः' इति शेषे षष्ठी। **विरतेति**। आभोगव्यतिकरेण छत्रवृत्तान्तेन। महान् अभिजनः कुलं यस्य तस्मिन्। अक्ष्णोः परः परोक्षः दर्शनाभावेऽपि मैत्रीं कुर्वाणः सुहृत् मित्रम्। शिशिरायन्ते शीतला भवन्ति 'कर्तुः क्यङ् सलोपश्च।' तिग्मतेजसः सूर्यस्य कराः किरणाः। के वयं सख्यस्य– सख्यं नास्मदायत्तम्। समालम्बितं गृहीतं शरासनं धनुर्येन। **हंसवेग इति**। अभिजातमुचितम्। अभिनन्दितः स्वीकृतः

नन्दितास्मदीयप्रणयो देवोऽपि दिवसैः कतिपयैरेव परागतः **प्राग्ज्योतिषेश्वर** इति करोतु चेतसि ' इत्युक्त्वा तूष्णीमभूदचिराच्च नमस्कृत्य निर्जगाम।

राजापि रजनीं तां **कुमार**दर्शनौत्सुक्यस्वीकृतहृदयः समनैषीत्। प्रभाते च प्रभूतं प्रतिप्राभृतं प्रधानप्रतिदूताधिष्ठितं दत्त्वा **हंसवेगं** प्राहिणोत्। आत्मनापि ततः प्रभृति प्रयाणकैरनवरतैरभ्यमित्रं प्रावर्तत । कदाचित्तु **राज्यवर्धन**भुजबलोपार्जितमशेषं **मालवराज**साधनमादायागतं समीप एवावासितं लेखहारकाद्भण्डिमशृणोत् । श्रुत्वा चाभिनवीभूतभ्रातृशोकहुताशनः कातरहृदयो बभूव मूर्च्छान्धकारमिव विवेशातिष्ठच्च समुत्सृष्टसकलव्यापारः प्रतीहारनिवारणनिभृतनिःशब्दपरिजने निजमन्दिरे सराजकपरिवारस्तदागमनमुदीक्षमाणो मुहूर्तम् ।

अथ **भण्डि**रेकेनैव वाजिना कतिपयकुलपुत्रपरिवृतो मलिनवासा रिपुशरशल्यपूरितेन निखातबहुलोहकीलकपरिकररक्षितस्फुटनेनेव हृदयेन **दुर्योधन**निधनदुर्मना इव **द्रौणी** राजद्वारमाजगाम । अवतीर्य च तुरंगमादवनतमुखो विवेश राजमन्दिरम् । दूरादेव च विमुक्ताक्रन्दः पपात पादयोः ।

अवनिपतिरपि दृष्ट्वा तमुत्थाय विरलैः पदैः प्रत्युद्गम्योत्थाप्य च गाढमुपगूह्य कण्ठे करुणमतिचिरं रुरोद । शिथिलीभूतमन्युवेगश्च पुरेव पुनरागत्य निजासने निषसाद । प्रथमप्रक्षालितमुखे च **भण्डौ** मुखमक्षालयत् । समतिक्रान्ते च कियत्यपि काले भ्रातृमरणवृत्तान्तमप्राक्षीत् । अथाकथयच्च यथावृत्तमखिलं **भण्डिः** । अथ नरपतिस्तमुवाच ' **राज्यश्री**व्यतिकरः कः ' इति । स पुनरवादीत् ' देव देवभूयं गते देवे **राज्यवर्धने गुप्त**नाम्ना च

अस्मदीयः प्रणयः प्रार्थना येन सः । **राजेति** । प्रतिप्राभृतं प्रत्युपहारम् । अमित्रं शत्रुं अभिमुखं अभ्यमित्रम् ' लक्षणेनाभिप्रती आभिमुख्ये ' इत्यव्ययीभावः । साधनं सैन्यम् । आवासितं कृतनिवेशम् । प्रतीहारस्य द्वारपालस्य निवारणेन प्रतिषेधेन निभृताः निश्चलाः निःशब्दाः वाचंयमाः परिजनाः सेवका यस्मिन् । **अथेति** । रिपोः मालवराजस्य शराणां शल्यैः कीलकैः पूरितेन व्याप्तेन । निखाताः दृढं निहिताः बहवः लोहकीलका बाणानामयोमयाः फलकाः तेषां परिकरेण परिवारेण रक्षितं प्रतिबद्धं स्फुटनं भङ्गो यस्य तादृशेन हृदयेन उपलक्षितः । ' इत्थंभूतलक्षणे ' इति तृतीया । **अवनिपतिरिति** । विरलैः अल्पैः । शिथिलीभूतः मन्युवेगः दुःखावेशः यस्य । राज्यश्रियः श्रीहर्षस्य स्वसुः व्यतिकरः वृत्तान्तः कः । देवभूयं देवभावं गते मृते इत्यर्थः । 'भुवो भावे' इति क्यप् । कुशस्थले कान्यकुब्जदेशे ।

गृहीते **कुशस्थले राज्यश्रीः** परिभ्रश्य बन्धनाद्विन्ध्याटवीं सपरिवारा प्रविष्टेति लोकतो वार्तामशृणवम् । अन्वेष्टारस्तु तां प्रति प्रभूताः प्रहिता जना नाद्यापि निवर्तन्ते ' इति । तच्चाकर्ण्य भूपतिरब्रवीत्— 'किमन्यैरनुपदिभिः यत्र सा तत्र परित्यक्तान्यकृत्यः स्वयमहं यास्यामि । भवानपि कटकमादाय प्रवर्ततां **गौडाभिमुखम्**' इत्युक्त्वा चोत्थाय स्नानभुवमगात् । कारितशोकश्मश्रुवपनकर्मणा शारीरकवसनकुसुमाङ्गरागालंकारप्रकटितप्रसादेन **भण्डिना** सार्धमभुक्त निनाय च तेनैव सह वासरम् । अन्यस्मिंश्चाहनि हयैः स्वसारमन्वेष्टुमुच्चचाल **विन्ध्याटवी**मवाप च परिमितैरेव प्रयाणकैस्ताम् । अथ प्रविशन्दूरादेवाटवीकुटुम्बिनां गृहैरुपेतं वनग्रामकं ददर्श तत्रैव चावसदिति ।

इति हर्षचरितसारे छत्रलब्धिर्नाम चतुर्थ उच्छ्वासः ।

अनुपदिभिः अनुगन्तृभिः । कटकं सैन्यम् । कारितं शोकश्मश्रुणः शोकवशेन रक्षितमुखलोम्नां वपनकर्म यस्य । शारीरकाणि शरीरसंबद्धानि वसनानि वस्त्राणि कुसुमानि अङ्गरागः अङ्गविलेपनद्रव्यं कुङ्कुमादि अलंकारश्च तैः प्रकटितो व्यक्तीकृतः प्रसादः अनुग्रहो यस्मिन् । अटवीकुटुम्बिनां अरण्यवासिजनानां वनग्रामकं अल्पाकारमरण्यग्रामं ' अल्पार्थे कन् ' । ददर्श अपश्यत् ।

इति हर्षचरितसारस्य बालमनोरमाख्यायां व्याख्यायां चतुर्थोच्छ्वासः ।

पञ्चम उच्छ्वासः।

विद्वज्जनसंपर्को नष्टेष्टज्ञातिदर्शनाभ्युदयः ।
कस्य न सुखाय भुवने भवति महारत्नलाभश्च ॥

अथापरेद्युरुत्थाय पार्थिवस्तस्माद्ग्रामकान्निर्गत्य विवेश विन्ध्याटवीम् । आट च तस्यामितश्चेतश्च सुबहून् दिवसान् । एकदा तु भूपतेर्भ्रमत एवाटविकसामन्त**शरभकेतोः** सूनु**र्व्याघ्रकेतु**र्नाम कुतोऽपि कज्जलश्यामलतावलयेनाधिललाटमुच्चैः कृतमौलिबन्धम्, अन्धकारिणीमकारणभुवा भ्रुकुटिभङ्गेन त्रिशाखेन त्रियामामिव साहससहचारिणीं ललाटस्थलीं सदा समुद्वहन्तम्, अवनाटनासिकम्, चिपिटाधरम्, चिक्किनचिबुकम्, अहीनहनूत्कटकपोलकूटास्थिपर्यन्तम्, ईषदवाग्रग्रीवाबन्धम्, स्कन्नस्कन्धार्धभागम्, अनवरतको-

---

विद्वज्जनेति । विद्वज्जनस्य पण्डितस्य संपर्कः संगतिः । नष्टाया इष्टज्ञातेः स्वप्रियसंबन्धिनः दर्शनमेवाभ्युदयो वृद्धिः । महारत्नस्य महार्हवस्तुनश्च लाभो भुवनेऽस्मिञ्जगति कस्य न सुखाय भवति कस्मै आनन्दं न वितरति । सर्वस्यैवेति भावः । अनेनास्मिन्नुच्छ्वासे वर्ण्यमाना बौद्धभिक्षुणा दिवाकरमित्रेण सह श्रीहर्षस्य मैत्री, राज्यश्रियो विन्ध्याटव्यां दर्शनं, मन्दाकिनीनाम्न्या एकावल्याः प्राप्तिश्च सूचिता। **अथेति** । अपरेद्युरपरस्मिन्नहनि– 'सद्यः परुत्परार्यैषमः–' इति सूत्रेण निपातः । आट बभ्राम 'अट गतौ' इति धातोर्लिट् । अटव्यां चरतीति आटविक आरण्यकः । कज्जलवत् अञ्जनवत् श्यामला कृष्णवर्णा श्यामलता व्रततिविशेषस्तस्या वलयेन । ललाटे इति अधिललाटम् विभक्त्यर्थेऽव्ययीभावः । कृतो मौलिबन्धः केशसंयमनं येन ' चूडा किरीटं केशाश्च संयता मौलयस्त्रयः ' इत्यमरः । अकारणभुवा अनैमित्तिकेन सहजेन । तिस्रः शाखा यस्य तेन त्रिभागेण भ्रुकुटिभङ्गेन 'इत्थंभूतलक्षणे' इति तृतीया । त्रियामा रात्रिः । सहसा बलेन निर्वृत्तं कर्म साहसम् । त्रियामापक्षे ' मनुष्यमारणं स्तेयं परदाराभिमर्षणम् । पारुष्यमनृतं चैव साहसं पञ्चधा स्मृतम् ।' इति स्मृत्युक्तं दुष्टं कर्म । तस्य सहचारिणीं तेन सह सदैव वर्तमानाम् । ललाटस्थलीं विस्तीर्णललाटम् अवनाटा नता नासिका यस्य 'अवटीटोऽवनाटश्चावभ्रटो नतनासिके' इत्यमरः । चिपिटः पृथुः अधरः अधरोष्ठो यस्य । चिक्किनं नतं चिबुकं अधरोष्ठस्याधोभागो यस्य । अहीना स्थूला हनुर्यस्य स चासौ उत्कट उन्नतः कपोलकूटस्य गण्डोन्नतभागस्य अस्थ्नः पर्यन्तः प्रान्तभागो यस्य स च ईषत् । अल्पं अवाग्रो नतो ग्रीवाबन्धः कंधराबन्धो यस्य । स्कन्नः अवनतः । अनवरतं सततं कोदण्डस्य धनुषः कुण्डलीकरणं वलयवन्नामनं तेन कर्कशो महान् व्यायामः श्रमेण

दण्डकुण्डलीकरणकर्कशव्यायामविस्तारितेनांसलेनोरसा हसन्तमिव तटशिलाप्रथिमानं विन्ध्यगिरेः, अजगरगरीयसा च भुजयुगलेन लघयन्तं तुहिनशैलशालद्रुमाणां द्राघिमाणम्, वराहवालवलितबन्धनाभिर्नागदमनजूटिकावाटिकाभिर्जटिलीकृतपृष्ठे प्रकोष्ठे प्रतिष्ठां गतं गोदन्तमणिचित्रं त्रापुषं वलयं बिभ्राणम्, अतुन्दिलमपि तुण्डिभम्, पारदरसलेशलिप्तसमस्तमस्तकया कृपाण्या करालितविशङ्कटकटिप्रदेशम्, अच्छभल्लचर्ममयेन भल्लीप्रायप्रभूतशरभृता शबलशार्दूलचर्मपीडितेन पृष्ठभागभाजा भस्त्राभरणेन पल्लवितमिव कार्ष्ण्यमुपदर्शयन्तम्, यन्त्रोल्लिखितमश्मसारस्तम्भमिव भ्रमन्तम्, शबरयुवानमादायाजगाम । दूरे च स्थापयित्वा विज्ञापयांबभूव। 'देव सर्वस्यास्य विन्ध्यस्य स्वामी सर्वपल्लीपतीनां प्राग्रहरः शबरसेनापतिर्**भूकम्पो** नाम। तस्यायं **निर्घात**नामा स्वस्रीयः सकलस्यास्य विन्ध्यकान्तारारण्यस्य पर्णानामप्यभिज्ञः किमुत प्रदेशानाम् । एनं पृच्छतु देवः, योग्योऽयमाज्ञां कर्तुम् । ' इति कथिते च **निर्घातस्तु** क्षितितलनिहितमौलिः प्रणाममकरोदुपानिन्ये च तित्तिरिणा सह शशोपायनम् । अवनिपतिस्तु संमानयन्स्वयमेव तमप्राक्षीत् । ' अङ्ग, अभिज्ञा यूयमस्य सर्व-

---

पौरुषसंपादको व्यापारस्तेन विस्तारितेन । अंसलेन बलवता ' वत्सांसाभ्यां कामबले ' इति लच् । विन्ध्यगिरेः तटशिलानां प्रथिमानं पृथुत्वं हसन्तं तिरस्कुर्वन्तम् । द्राघिमाणं दीर्घताम् ' पृथ्वादिभ्य इमनिज्वा ' इति भावे इमनिच् । ' प्रियस्थिर ' इत्यादिना दीर्घस्य द्राघ्यादेशः । लघयन्तं लघुं कुर्वन्तम् 'लघु'शब्दात् ' तत्करोति तदाचष्टे ' इति णिचि लटः शत्रादेशः । वराहस्य सूकरस्य बालैः केशैः वलितानि वेष्टितानि बन्धनानि यासाम् । नागदमनस्य विषहरस्यौषधिभेदस्य जूटिकानां लघुमूलानां वाटिकाः पूल्यस्ताभिः जटिलीकृतं पूरितं पृष्ठं पृष्ठभागो यस्य तस्मिन् प्रकोष्ठे मणिबन्धाधोभागे । प्रतिष्ठां गतं स्थापितम् । गोदन्तः सर्पभेदः । त्रपुणो विकारं त्रापुषं ' तस्य विकार ' इत्यणि ' त्रपुजतुनोः षुक् ' इति षुगागमः । अतिशयितं तुन्दमुदरं यस्येति तुन्दिलः स्थूलोदरः, अतुन्दिलः कृशोदरः । तुण्डिभ उन्नतनाभिः । ' तुण्डिबलिवटेर्भः ।' ' वृद्धनाभौ तुण्डिलतुण्डिभौ ' इत्यमरः । पारदस्य रसेन्द्रस्य रसस्य लेशेन लिप्तं समस्तमस्तकं समग्राग्रभागो यस्यास्तया कृपाण्या छुरिकया। अच्छभल्लस्य ऋक्षस्य चर्ममयेन चर्मनिर्मितेन। भल्ली बाणविशेषः। शबलेन चित्रेण शार्दूलचर्मणा व्याघ्रचर्मणा पीडितेन संयतेन । भस्त्राभरणेन । तूणीरभूषणेन । पल्लवितं संजातपर्णम् 'तदस्य संजातमिति तारकादिभ्य इतच्' । कार्ष्ण्यं कृष्णवर्णम् । यन्त्रे अश्मघर्षणचक्रे उल्लिखितं तनूकृतं अश्मसारस्य शिलारत्नस्य स्तम्भमिवेत्युत्प्रेक्षा । पल्लीपतीनां ग्रामाधिपतीनाम् । स्वस्रीयः स्वसुस्तनयः ' स्वसुश्छः ' इति अपत्यार्थे छः । उपनिन्ये उपाज

स्योद्देशस्य। विहारशीलाश्च दिवसेष्वेतेषु भवन्तः। सेनापतेर्वान्यस्य वा तदनुजीविनः कस्यचिदुदाररूपा नार्यागता भवेद्दर्शनगोचरम्' इति।

निर्घातस्तु भूपालालापनप्रसादेनात्मानं बहु मन्यमानः प्रणनाम दर्शितादरं च व्यज्ञापयत्– 'देव प्रायेणात्र हरिण्योऽपि नापरिगताः संचरन्ति: सेनापतेः कुत एव नार्यो नाप्येवंरूपा काचिदबला। तथापि देवादेशादिदानीमन्वेषणं प्रति प्रतिदिनमनन्यकृत्यैः क्रियते यत्नः। इतश्चार्धगव्यूतिमात्र एव मुनिमहिते महति महीरुहां षण्डे पिण्डपाती प्रभूतान्तेवासिपरिवृतः पाराशरी **दिवाकर**नामा गिरिनदीमाश्रित्य प्रतिवसति स यदि विन्देद्वार्ताम्' इति। तच्छ्रुत्वा नरपतिरचिन्तयत्– 'श्रूयते हि तत्रभवतः सुगृहीतनाम्नः स्वर्गतस्य **ग्रहवर्मणो** बालमित्रं मैत्रायणीयस्त्रयीं विहाय ब्राह्मणायनो विद्वानुत्पन्नसमाधिः सौगते मते युवैत्र काषायाणि गृहीतवान् इति। प्रायशश्च जनस्य जनयति सुहृदपि दृष्टो भृशमाश्वासम्। अभिगमनीयाश्च गुणाः सर्वस्य। कस्य न प्रतीक्ष्यो मुनिभावः। यतो नः कुतूहलि हृदयमभूत् सततमस्य दर्शनं प्रति प्रासङ्गिकमेवेदमापतितमतिकल्याणं पश्यामः प्रयत्नप्रार्थितदर्शनं जनम्' इति। प्रकाशं चाब्रवीत्– 'अङ्ग समुपदिश तमुद्देशं यत्रास्ते स पिण्डपाती' इति। एवमुक्त्वा च तेनैवोपदिश्यमानवर्त्मा प्रावर्तत गन्तुम्।

हार। सेनापतेः शबरसेनापतेः भूकम्पाख्यस्य। अस्य 'दर्शनगोचरम्' इत्यनेनान्वयः। उदारं सुन्दरं रूपं यस्याः सा। **निर्घात इति**। आत्मानं बहु मन्यमानः आत्मानं आदृतं मन्वानः। सेनापतेः अपरिगताः अज्ञाताः 'मतिबुद्धिपूजार्थेभ्यश्च' इति वर्तमाने क्तः। 'क्तस्य च वर्तमाने' इति षष्ठी। देवादेशात् भवदाज्ञया। गव्यूतिः क्रोशयुगम् 'अध्वपरिमाणे च' इति वार्तिकेन गोर्यूतौ परे अवादेशः। महीरुहां षण्डे वृक्षाणां समूहे। पिण्डपातो भिक्षाचरणं जीविकासाधनत्वेन अस्त्यस्येति तादृशः। अन्ते गुरुसमीपे वस्तुं शीलं यस्य स छात्रः। पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीयते इति पाराशरी संन्यासी 'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः' इति णिनिः। मैत्रायणीयः कृष्णयजुर्वेदस्य मैत्रायणीशाखाया अध्येता। त्रयीं विहाय सनातनधर्ममुत्सृज्येत्यर्थः। 'स्त्रियामृक् सामयजुषी इति वेदास्त्रयस्त्रयी' इत्यमरः। ब्राह्मणायनो द्विजवरिष्ठः। सौगते मते बौद्धधर्मे उत्पन्ना समाधिरैकाग्र्यं यस्य। काषायाणि गृहीतवान् बौद्धभिक्षुर्बभूवेत्यर्थः। आश्वासं सान्त्वनम्। प्रतीक्ष्य आदरार्हः। प्रासङ्गिकं प्रसङ्गे प्राप्तम्।

अथ क्रमेण गच्छतस्तस्य इन्द्रनीलमयाः प्रासादा इव वनदेवतानां पुरस्ताद्दर्शनपथमवतेरुस्तरवः। ततोऽवतीर्य च गिरिसरिति समुपस्पृश्य युगपद्विश्रामसमयंसमुन्मुक्तहेषाघोषबधिरीकृताटवीगहनामस्मिन्नेव प्रदेशे स्थापयित्वा वाजिसेनाम्, अवलम्ब्य च तपस्विजनदर्शनोचितं विनयं हृदयेन दाक्षिणेन च हस्तेन **माधवगुप्त**मंसे, विरलैरेव राजभिरनुगम्यमानश्चरणाभ्यामेव प्रावर्तत गन्तुम्।

तेषां तरूणां मध्ये नानादेशीयैः स्थानस्थानेषु स्थाणून्राश्रितैः, शिलातलेषूपविष्टैः, लताभवनान्यध्यावसद्भिः, अरण्यानीनिकुञ्जेषु निलीनैः, तरुमूलानि निषेवमाणैर्वीतरागैरार्हतैर्मस्करिभिः श्वेतपटैर्भागवतैः कापिलैर्लोकायतिकैः, काणादैरौपनिषदैरैश्वरकारणिकैर्धर्मशास्त्रिभिः पौराणिकैः साप्ततन्तवैः शैवैः शाब्दैः पाञ्चरात्रिकैरन्यैश्च स्वान् स्वान्सिद्धान्ताञ्शृण्वद्भिश्चिन्तयद्भिश्च प्रत्युच्चरद्भिश्च संशयानैश्च निश्चिन्वद्भिश्च व्युत्पादयद्भिश्च विवदमानैश्चाभ्यस्यद्भिश्च शिष्यतां प्रतिपन्नैर्दूरादेवावेद्यमानम्, अतिविनीतैः कपिभिरपि चैत्यकर्म कुर्वाणैः त्रिसरणपरैः परमोपासकैः शुकैरपि शाक्यशासनकुशलैः कोशं समुपदिशद्भिः, अनवरतश्रवणगृहीतालोकैः कौशिकैरपि बोधिसत्त्वजातकानि जपद्भिः,

---

अथेति। युगपत् समकालमेव। विश्रामसमये विश्रान्तिकाले समुन्मुक्ताया हेषाया अश्वशब्दस्य घोषेण नादेन बधिरीकृतानि अज्ञायमानशब्दान्तरीकृतानि अटवीगहनानि काननगह्वराणि यया ताम्। **तेषामिति**। महदरण्यं अरण्यानी 'इन्द्रवरुणभव–' इति सूत्रेणानुक् आगमः ङीष् प्रत्ययश्च। 'हिमारण्ययोर्महत्त्वे' इति वार्तिकेन महत्त्वमर्थः। निषेवमाणैः आश्रयद्भिः वीता गता रागा अन्तःकरणदोषा येभ्युस्ते। अर्हन् देवता येषां ते आर्हता जैनाः 'साऽस्य देवता' इत्यण्। मस्करो वेणुर्येषामस्तीति मस्करिणः परिव्राजकाः 'पाराशर्यपि मस्करी' इत्यमरः। भगवान् विष्णुर्देवता येषां ते भागवताः विष्णुभक्ताः। कापिलैः कपिलमतानुयायिभिः। सांख्यैः। अयमेव लोक आयतिर्येषां ते लोकायतिकाश्चार्वाकाः। काणादैर्वैशेषिकैः। औपनिषदैः वेदान्तवादिभिः। साप्ततन्तवैः अध्वरमीमांसकैः। पांचरात्रिकैः पञ्चरात्रमतानुयायिभिः। विवदमानैः विवादं कुर्वद्भिः 'भासनोपसंभाषा–' इति सूत्रेणात्मनेपदम्। चैत्यकर्म संमार्जनादि। त्रीणि बुद्धधर्मसंघरूपाणि शरणानि तानि पराणि प्रधानानि येषां तैः। शाक्यशासनं बुद्धधर्मम्। 'कोशो बुद्धसिद्धान्तो वसुबन्धुकृतः' इति संकेते। अनवरतं सततं श्रवणेन आकर्णनेन पक्षे कर्णेन च गृहीत आलोकः धर्मज्ञानं पक्षे प्रकाशश्च यैस्तैः कौशिकैः दिवान्धैः उलूकैः। बोधिनः ज्ञातुरिव सत्त्वं ज्ञानं येषां ते जन्मान्तरे बुद्धभावार्हाः प्राणिनः तेषां जातकानि

जातसौगतशीलशीतलस्वभावैः शार्दूलैरप्यमांसाशिभिरुपास्यमानम् , उपशममिव पिबद्भिर्वनहरिणैर्जिह्वालताभिरुपलिह्यमानपादपल्लवम् , वामकरतलनिविष्टेन नीवारमश्नता पारावतपोतेन मैत्रीं प्रसादयन्तम् , उद्ग्रीवं मयूरं मरकतमणिकरकमिव वारिधाराभिः पूरयन्तम् , इतस्ततः पिपीलिकाश्रेणीनां श्यामाकतण्डुलकणान् स्वयमेव किरन्तम् अरुणेन चीवरपटलेन म्रदीयसा संवीतम् , मध्यमे वयसि वर्तमानं **दिवाकरमित्र**मद्राक्षीत् । अतिप्रशान्तगम्भीराकारारोपितबहुमानश्च सादरं दूरादेव शिरसा मनसा वचसा च ववन्दे ।

दिवाकरमित्रस्तु मैत्रीमयः प्रकृत्या विशेषतस्तेनापरेणादृष्टपूर्वेणामानुषलोकोचितेन सर्वाभिभाविना भ्राजिष्णुना भूपतेरप्राकृतेनाकारविशेषेण तेन चाभिजात्यप्रकाशकेन गरीयसा प्रश्रयेण चाह्लादितश्चक्षुषि चेतसि च युगपदग्रहीत् । धीरस्वभावोऽपि संपादितससंभ्रमाभ्युत्थानः संकलय्य किंचिदुद्गमनकेन विलोलं लम्बमानं वामांसाच्चीवरपटान्तमुत्क्षिप्यानेकाभयदानदीक्षादक्षिणो दक्षिणं महापुरुषलक्षणलेखाप्रशस्तं हस्तं स्निग्धमधुरया वाचा सगौरवमारोग्यदानेन राजानमन्वग्रहीत । अभ्यनन्दच्च स्वागतगिरा । गुरुमिवाभ्यागतं बहु मन्यमानः स्वेनासनेनाध्वमत्रेति निमन्त्रयाञ्चकार । पार्श्वे स्थितं च शिष्यमब्रवीत् – आयुष्मन् , उपानय कमण्डलुना पादोदकमिति । राजा त्वचिन्तयत् – 'अलोहः खलु संयमनपाशः सौजन्यमभिजातानाम् । स्थाने खलु तत्रभवान् गुणानुरागी **ग्रहवर्मा** बहुशो वर्णितवानस्य गुणान्' इति । प्रकाशं चाबभाषे – 'भगवन् दर्शनपुण्यानुगृहीतस्य मम पुनरुक्त इवायमार्य-

---

जन्मकथाः । जातः सौगतशीलैः अहिंसादिभिः बुद्धप्रणीतनियमैः शीतलो मृदुः स्वभावः येषां तैः । मांसं नाश्नन्तीति तैरमांसाशिभिः । उपशमं शान्तिम् । नीवारं मुनिधान्यम् । 'अपकारिण्यपि प्रीतिर्मैत्री' इति संकेते । करकं कमण्डलुम् 'कमण्डलौ च करकः'। चीवरं मुनिवासः । म्रदीयसा मृदुतरेण। **दिवाकरमित्र इति** । प्रकृत्या स्वभावेन । अमानुषलोकोचितेन दैवलोकार्हेण दिव्येनेत्यर्थः । सर्वान् अभिभवति पराजयते इति तेन । भ्राजितुं शीलं यस्य तेन भ्राजिष्णुना रोचिष्णुना 'भुवश्च' इति चकाराद् भ्राजेरपि ताच्छीलिक इष्णुच् । अभिजातस्य कुलीनस्य भावः आभिजात्यम् । **चक्षुषीति** । दर्शनसमकालमेव चेतसा संमानयांचक्रे इत्यर्थः । धीरो विकाररहितः स्वभावो यस्य सः । संकलय्य संगृह्य । उद्गमनकेन स्वागतार्थमुत्थानेन विलोलं चञ्चलम् । आध्वं उपविशत 'आस्'धातोर्लोट् । 'धि च' इति सकारलोपः । सौजन्यं अलोहः आयसनिगडरहितः संयमनपाशः बन्धनपाशः । तत्रभवान् असंनिहितः । स्थाने इति उचितार्थकं विभक्तिप्रतिरूपकमव्ययम् । चक्षुः-

प्रयुक्तः प्रतिभात्यनुग्रहः । चक्षुष्प्रदानप्रसादस्वीकृतस्य च परकरणमिवासना-दिदानोपचारचेष्टितम् । पाद्यमप्यपार्थकम् । आसतां भवन्तो यथासुखम् । आसीनोऽहम् इत्यभिधाय क्षितावेवोपाविशत् ।

पुनः पुनरभ्यर्थ्यमानोऽपि यदा न प्रत्यपद्यत पार्थिवो वचनं तदा स्वमेवासनं पुनरपि भेजे भदन्तः । भूपतिमुखनलिननिहितनिभृतनयनयुगल-निगडनिश्चलीकृतहृदयश्च स्थित्वा कांचित्कालकलामवादीत्— 'अद्यप्रभृति न केवलमयमनिन्द्यो वन्द्योऽपि प्रकाशितसत्सारः संसारः । किं नाम नालोक्यते जीवद्भिरद्भुतं येन रूपमचिन्तितोपनतमिदं दृक्पथमुपगतम् । एवंविधैरनुमी-यन्ते जन्मान्तरावस्थितसुकृतानि हृदयोत्सवैः । इहापि जन्मनि दत्तमेवास्मा-कममुना तपःक्लेशेन फलमसुलभदर्शनं दर्शयता देवानां प्रियम् । आ तृप्तेः पीतममृतमीक्षणाभ्याम् । सुदिवसः स यस्मिञ्जातोऽसि । सा सुजाता जननी या सकलजीवलोकजीवितजनकमजनयदायुष्मन्तम् । धन्यः स भूभृद्यस्य वंशे सम्भूतोऽसि । एवंविधस्य च पुण्यवतः कथंचित्प्राप्तस्य केन प्रियं समा-चराम इति पारिप्लवं चेतो नः । सकलवनचरसार्थसाधारणस्य कन्दमूल-फलस्य गिरिसरिदम्भसो वा के वयम् । यदि नोपरुणद्धि काश्चित्कार्यलवम-रक्षणीयाक्षरं वा कथनीयं तत्कथयतु भवान्, श्रोतुमभिलषति हृदयं सर्वमिदं नः । केन कृत्यातिभारेण भव्यो भूषितवान्भूमिमेतामभ्रमणयोग्याम् । कियद-वधिर्वा शून्याटवीपर्यटनक्लेशः कल्याणराशेः । कस्माच्च संतप्तरूपेव ते

प्रदानं अवलोकनं एव प्रसादः अनुग्रहः तेन स्वीकृतस्य । परकरणं आत्मासंबधख्या-पनम् । पादप्रक्षालनार्थं जलं पाद्यम् 'पादार्घाभ्यां च' इति यत् । अपार्थकं व्यर्थम् । **पुनःपुनरिति** । प्रत्यपद्यत स्वीचकार । भदन्तो बौद्धभिक्षुः । भूपते राज्ञो मुखं नलिनं कमलमिव तस्मिन् निहितं निभृतं निश्चलं नयनयुगलमेव निगडः शृङ्खला तेन निश्चलीकृतं निःस्पन्दीकृतं हृदयं यस्य । कालकलां कालांशम् 'कालाध्वनोरत्यन्तसंयोगे द्वितीया ।' प्रकाशितः प्रकटितः सन् शोभनः सारः स्थिरांशो येन सः । आ तृप्तेः तृप्तिं यावत् । सकलस्य जीवलोकस्य प्राणिलोकस्य जीवितस्य प्राणानां जनकं उत्पादकम् । पारिप्लवं चलं अनिश्चितम् । सकलस्य वनचरसार्थस्य अरण्यवासिप्राणिसमूहस्य साधारणं समानं तस्य । के वयं— न तदर्पणेऽस्माकं स्वामित्वमित्यर्थः । यदि कश्चित् मादृशः आगमनप्रयोजनप्रश्नेन कार्यलवं कार्यांशं नोपरुणद्धि न प्रतिबध्नाति । कथनीयं वृत्तान्तः । अरक्षणीयं अक्षरं यस्मिन् तादृशं रहस्यहीनमित्यर्थः । कृत्यातिभारेण कार्यगौरवेण । भव्यः कल्याणी 'भव्यगेय-' इत्यादिना

तनुरियमसंतापार्हा विभाव्यते ' इति ।

राजा तु सादरतरमब्रवीत्– 'आर्य, मधुरसविसरममृतमिव हृदयधृतिकरमनवरतं वर्षता वचसैव ते सर्वमनुष्ठितम् । धन्योऽस्मि यदेवमभ्यर्हितमनुपचरणीयमपि मान्यो मन्यते माम् । अस्य च महावनभ्रमणपरिक्लेशस्य कारणमवधारयतु मतिमान् । मम हि विनष्टनिखिलेष्टबन्धोर्जीवितानुबन्धस्य निबन्धनमेकैव यवीयसी स्वसाऽवशेषा । सापि भर्तुर्वियोगाद्वैरिपरिभवभयाद्भ्रमन्ती कथमपि **विन्ध्यवन**मिदमाविशत् । अतस्तामन्वेष्टुं वयमनिशं निशि निशि च सततमिमामटवीमटामः । न चैनामासादयामः । कथयतु च गुरुरपि यदि कदाचित्कुतश्चिद्वनचरतः श्रुतिपथमुपगता तद्वार्ता' इति ।

अथ तच्छ्रुत्वा जातोद्वेग इव भदन्तः पुनरभ्यधात् । ' धीमन्, न खलु कश्चिदेवंरूपो वृत्तान्तोऽस्मानभ्युपगतवान् । अभाजनं हि वयमीदृशानां प्रियाख्यानोपायनानां भवताम् । ' इत्येवं भाषमाण एव तस्मिन्, अकस्मादागत्यापरः शमिनि वयसि वर्तमानः संभ्रान्तरूप इव पुरस्तादुपरचिताञ्जलिर्जातकरुणः प्रक्षरितचक्षुर्भिक्षुरभाषत– ' भगवन्भदन्त, महत्करुणं वर्तते । बालैव बलवद्व्यसनाभिभूता कल्याणरूपा स्त्री शोकावेशविवशा वैश्वानरं विशति । संभावयतु तामप्रोषितप्राणां भगवान् । अभ्युपद्यतां समुचितैः समाश्वासनैः ' इति ।

राजा तु जातानुजाशङ्कः सोदर्यास्नेहाचान्तर्द्रुत इव दुःखेन दोदूयमान-

---

कर्तरि कृत्यप्रत्ययान्तो निपातः । कियान् अवधिर्यस्य सः कियन्तं कालं यावदित्यर्थः । **राजेति**। मधुरसस्य क्षौद्ररसस्य विसरं प्रसरम् 'विसरः प्रसरे व्रजे' इति मेदिनी । अनुपचरणीयमादरानर्हम् । अभ्यर्हितं पूज्यम् । जीवितस्य आयुषः अनुबन्धः सातत्यं तस्य निबन्धनं कारणम् । यदर्थमेव जीवामीत्यर्थः । यवीयसी कनीयसी ' स्थूलदूरयुवह्रस्व–' इत्यादिना 'ईयस्' प्रत्यये परे युवन् शब्दस्य 'वन्' इत्यंशस्य लोप पूर्वस्य च गुणः । ततो ङीप् । **अथेति** । जात उद्वेगो विषादो यस्य । अभ्यधात् उवाच अभिपूर्वात् धाधातोः कर्तरि लुङ् । 'गातिस्था--' इति सिचो लुक् । प्रियाणि प्रीतिकराणि आख्यानानि वृत्तान्ताः, तान्येवोपायनानि उपहाराः तेषां अभाजनं अपात्रम्, तादृशान् वृत्तान्तान् कथयितुमसमर्था इत्यर्थः । शमः शान्तिः विद्यतेऽस्मिन्निति तस्मिन् वृद्धे । प्रक्षरिते अश्रुप्लुते चक्षुषी यस्य सः । कल्याणं मङ्गलं रूपं यस्याः सा । अप्रोषितप्राणां अनुपरताम् । अभ्युपपद्यतां सान्त्वयतु भगवानिति शेषः । **राजेति** । जाता अनुजाया यवीयस्याः स्वभगिन्याः आशङ्का

हृदयः कथमपि गद्गदिकागृहीतकण्ठो विक्लवाग्बाष्पायमाणदृष्टिः पप्रच्छ। ‘पाराशरिन्, कियद्दूरे सा योषिदेवंजातीया जीवेद्वा कालमेतावन्तमिति। पृष्टा वा त्वया कासि, कस्यासि, कुतोऽसि, किमर्थं वनमिदमभ्युपगतासि, विशसि च किंनिमित्तमनलमित्यादितः प्रभृति कार्त्स्न्येन कथ्यमानमिच्छामि श्रोतुं कथमार्यस्य गता गोचरमाकारतो वा कीदृशी’ इति।

तथाभिहितस्तु भूभुजा भिक्षुराचचक्षे— ‘महाभाग, श्रूयताम्। अहं प्रत्युषस्येवाद्य वन्दित्वा भगवन्तमनेनैव नदीरोधसा सैकतसुकुमारेण विहृतवानतिदूरम्। एकस्मिंश्च वनलतागहने गिरिनदीसमीपभाजि नारीणां रुदितमधृतिकरमतिकरुणमाकर्णितवानस्मि। समुपजातकृपश्च गतोऽस्मि तं प्रदेशम्। दृष्टवानस्मि च दृषत्खण्डखण्डिताङ्गुलिगलल्लोहितेन चाध्वनीनश्रमश्वयथुनिश्चलचरणेन च स्थाणवव्रणव्यथितगुल्फबद्धभूर्जत्वचाऽबलानां चक्रवालेन परिवृताम्, कठोरदर्भाङ्कुरक्षतक्षारिणा क्षतजेनानुसारिणालक्तकेनेव रक्तचरणाम्, उन्नालेनान्यतरनारीधृतेनारविन्दिनीदलेन कृतच्छायमपि विच्छायं मुखमुद्वहन्तीम्, वनकुसुमधूलिधूसरितपादपल्लवाम्, प्रत्यूषप्रदीपशिखामिव क्षामक्षामां पाण्डुवपुषं योषितम्। सा तु समीपगते मयि तदवस्थाऽपि सबहुमान-

---

वितर्को यस्मिन् सः। दोदूयमानं भृशं पीड्यमानं हृदयं यस्य सः। दुनोतेर्यङन्ताच्छानच्। ‘आने मुक्’। पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीते इति पाराशरी भिक्षुः ‘पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः।’ योषित् स्त्री। गोचरं नेत्रविषयं गता दृष्टेत्यर्थः। **तथेति**। भगवन्तं दिवाकरमित्रम्। सिकताः सन्त्यस्मिन्निति सैकतं वालुकामयो देशः तेन सुकुमारं कोमलम्। सिकताशब्दात् ‘देशे लुबिलचौ च’ इति चकारात् अण् प्रत्ययः। वनलतानां गहने कानने। अधृतिकरं धैर्य नाशकम्। दृषत्खण्डैः शिलाखण्डैः खण्डिताभ्यो भग्नाभ्योऽङ्गुलिभ्यो गलत् क्षरत् लोहितं रक्तं यस्य तादृशेन, इदं ‘चक्रवालेन’ इत्यस्य विशेषणम्। अध्वनीनः अध्वजन्यः श्रमः श्वयथुः शोथश्च ताभ्यां निश्चलाश्चरणा यस्य तेन। ‘अध्वनो यत्खौ’ इति खप्रत्यये ‘आत्माध्वानौ खे’ इति प्रकृतिभावः। स्थाणोरिमे स्थाणवाः वृक्षजन्याः व्रणाः क्षतानि तैर्व्यथितेषु गुल्फेषु पादग्रन्थिषु बध्दा भूर्जत्वचो येन तादृशेन अबलानां स्त्रीणां चक्रवालेन समूहेन परिवृतां वेष्टिताम्। अनुसरति राज्यश्रिया सह वनं गच्छतीति तेन अलक्तकेन यावकरसेन। अरविन्दिनीदलेन कमलिनीपत्रेण। विच्छायं विवर्णम्। ‘छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः’ इत्यमरः। वनकुसुमानां अरण्यपुष्पाणां धूलिभिः रजःकणैः धूसरितौ पाण्डरी-

मानतमौलिः प्रणतवती। अहं तु प्रबलकरुणाप्रेर्यमाणस्तामालपितुकामः पुनः कृतवान्मनसि– 'कथमिव महानुभावामेनामामन्त्रये। 'वत्से' इत्यतिप्रणयः 'मातः' इति चाटु, 'भगिनी' इत्यात्मसम्भावना, 'देवि' इति परिजनालापः, 'उपासिके' इति मनोरथः, 'भद्रे' इतीतरस्त्रीसमुचितम्, 'आयुष्मति' इत्यवस्थायामप्रियम्।' इत्येवं चिन्तयत्येव मयि तस्मात्स्त्रैणादुत्थायान्यतरा योषिच्छोकविक्लवा समुपसृत्य कतिपयपलितशारं शिरो नीत्वा महीतलम्, अतुलहृदयसन्तापसूचकैरश्रुबिन्दुभिश्चरणयुगलं दहन्ती ममातिकृपणैरक्षरैश्च हृदयमभिहितवती– 'भगवन्, सर्वसत्वानुकम्पिनी प्रायः प्रव्रज्या। प्रतिपन्नदुःखक्षपणदीक्षादक्षाश्च भवन्ति सौगताः। करुणाकुलगृहं च भगवतः **शाक्यमुनेः** शासनम्। प्राणरक्षणाच्च न परं पुण्यजातं जगति गीयते जनेन। अनुकम्पाभूमयः प्रकृत्यैव युवतयः किं पुनर्विपदभिभूताः। यत इयं नः स्वामिनी मरणेन पितुरभावेन भर्तुः प्रवासेन च भ्रातुः भ्रंशेन च शेषस्य बान्धववर्गस्य, अतिमृदुहृदयतयाऽनपत्यतया च निरवलम्बना, परिभवेन च नीचारातिकृतेन प्रकृतिमनस्विनी दग्धदैवदत्तैर्बहुभिरुपर्युपरि व्यसनैर्विक्लवीकृतहृदया दारुणं दुःखमपारयन्ती सोढुम्, अश्रुव्याकुलनयनं परिभूय भृत्यवर्गमग्निं प्रविशति। परित्रायताम्। आर्योऽपि तावदसह्यशोकापनयनोपायोपदेशनिपुणां व्यापारयतु वाणीमस्याम्।' इति चातिकृपणं व्याहरन्तीमहमुत्थाप्योद्विग्नतरः शनैरभिहितवान्। 'आर्ये यथा कथयसि तथा। अस्मद्गिरामगोचरोऽयमस्याः पुण्याशायाः शोकः। शक्यते चेन्मुहूर्तमात्रमपि त्रातुमुपरिष्टान्न व्यर्थेयमभ्यर्थना भविष्यति। मम हि गुरुरपर इव भगवान् **सुगतः** समीपगत एव। कथिते मयाऽस्मिन्नुदन्ते नियतमागमिष्यति परम-

---

कृतौ पादपल्लवौ यस्याः। प्रत्यूषे कल्ये प्रदीपस्य शिखां ज्वालाम्। अतिप्रणयः भिक्षुजनायोग्यः स्नेहः। मनोरथः इयं भगवतो बुद्धस्योपासिका भविष्यतीति स्वेच्छायाः प्रकाशनम्। स्त्रैणात् स्त्रीसमूहात् 'स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्'। कतिपयैः पलितैः शुभ्रकेशैः शारं कर्बुरम्। अतिकृपणैरतिदीनैः। सर्वसत्वान् अखिलजन्तून् अनुकम्पते करुणां तेषु करोतीति तादृशी। प्रव्रज्या संन्यासः 'व्रजयजोर्भावे क्यप्'। प्रतिपन्ना अंगीकृता दुःखक्षपणस्य दुःखहरणस्य दीक्षा व्रतं तस्यां दक्षा अनलसाः। करुणायाः कुलगृहं पितृगृहम्। शाक्यमुनेः बुद्धस्य। निरवलम्बना असहाया। नीचेन दुष्टेन अरातिना शत्रुणा कृतेन परिभवेन अपमानेन। परिभूय अनादृत्य। अतिकृपणं अतिकरुणम्। पुण्यः आशयः

दयालुः। दुःखान्धकारपटलभिदुरैः सौगतैः सुभाषितैः स्वकैश्च गिरां कौशलैरेनां प्रबोधपदवीमारोपयिष्यति' इति। तच्च श्रुत्वा 'त्वरतामार्यः' इत्यभिदधानां सां पुनरपि पादयोः पतितवती। सोऽहमुपगत्य त्वरमाणो व्यतिकरमिममधृतिकरमत्रभवते गुरवे निवेदितवान् इति।'

अथ भूभृद्भैक्षवं समवधार्य तद्भाषितमश्रुमिश्रितमश्रुतेऽपि स्वसुर्नाम्नि सर्वाकारसंवादिन्या दशयैव दूरीकृतसंदेहो दग्धं इव सोदर्यावस्थाश्रवणेन श्रवणयोः श्रमणाचार्यमुवाच – आर्य, नियतं सैवेयमनार्यस्यास्य जनस्यातिकठिनहृदयस्य मन्दभाग्यस्य भगिनी भागधेयैरेतामवस्थां नीता निष्कारणवैरिभिर्वराकी विदीर्यमाणं मे हृदयमेवं निवेदयति' इत्युक्त्वा तमपि श्रमणमभ्यधात्– 'आर्य उत्तिष्ठ। दर्शय क्वासौ। यतः सुप्रभूतप्राणपरित्राणपुण्योपार्जनाय यामः, यदि कथंचिज्जीवन्तीं सम्भावयामः' इति भाषमाण एवोत्तस्थौ।

अथ समग्रशिष्यवर्गानुगतेनाचार्येण तुरगेभ्यश्चावतीर्य समस्तेन सामन्तलोकेन पश्चादाकृष्यमाणाश्वीयेनानुगम्यमानः पुरस्ताच्च तेन शाक्यपुत्रीयेण प्रदिश्यमानवर्त्मा पद्भ्यामेव तं प्रदेशमविरलैः पदैः पिबन्निव प्रावर्तत। क्रमेण च शुश्राव लतावनान्तरितस्य तस्य मुमूर्षोर्महतः स्त्रैणस्य तत्कालोचितानेकप्रकारानालापान्। ददर्श च मुह्यन्तीमग्निप्रवेशायोद्यतां राजा **राज्यश्रियम्**। आललम्बे च मूर्च्छामीलितलोचनाया ललाटं हस्तेन तस्याः ससंभ्रमम्।

अथ तेन भ्रातुः प्रेयसः प्रकोष्ठबद्धानामोषधीनां रसविसरमिव प्रत्युज्जीवनक्षमं क्षरता, प्रत्यानयतेव कुतोऽपि जीवितमाह्लादकेन हस्तसंस्पर्शेन सहसैव समुन्मिमील **राज्यश्रीः**। तथा चासंभावितागमनस्याचिन्तितदर्श-

---

हृदयं यस्याः तस्याः। उपरिष्टात् मुहूर्तादूर्ध्वम्। दुःखमेव अन्धकारपटलं तस्य भिदुरैः विनाशकैः। एनां प्रबोधपदवीमारोपयिष्यति। ज्ञानमार्गे स्थापयिष्यति। व्यतिकरं वृत्तान्तम्। **अथेति**। भिक्षोरिदं भैक्षवम्। 'तस्येदम्' इत्यण्। सर्वाकारैः सर्वथा संवदति संगच्छते इति तया दशयाऽवस्थया। श्रमणानां भिक्षूणामाचार्यम्। सुप्रभूतं प्राणपरित्राणपुण्यं प्राणरक्षणपुण्यं तस्योपार्जनाय प्राप्तये। **अथ समग्रेति**। शाक्यपुत्रीयेण शाक्यपुत्रस्य दिवाकरमित्रस्य संबन्धिना 'पुत्राच्छ च' इति छप्रत्ययः। मुमूर्षोः मरणेच्छोः मूर्च्छया संज्ञापगमेन मीलिते लोचने यस्याः तादृश्याः। **अथ तेनेति**। प्रत्युज्जीवने प्राणानां प्रत्यानयने क्षमं समर्थम्। समुन्मिमील लोचने विवृतवती। असंभावितं अतर्कितं आगमनं यस्य तस्य।

नस्य सहसा प्राप्तस्य भ्रातुः कण्ठे समाश्लिष्य तत्कालाविर्भावनिर्भरेणाभिभूतसर्वात्मना दुःखसम्भारेण स्थूलप्रवाहमुत्सृजन्ती बाष्पवारि विलोचनाभ्याम् 'हा तात, हा अम्ब, हा सख्यः' इति व्याहरन्ती मुक्तकण्ठमतिचिरं विक्रुश्य 'वत्से स्थिरा भव त्वम्' इति भ्रात्रा करस्थगितमुखी समाश्वास्यमानापि 'कल्याणिनि, कुरु वचनमग्रजस्य गुरोः' इत्याचार्येण याच्यमानापि 'स्वामिनि, भ्रातरमवेक्षस्व' इति परिजनेन विज्ञाप्यमानापि प्रभूतमन्युभारभरितान्तःकरणा करुणकाहलेन स्वरेण कतिचित्कालमतिचिरं रुरोद। विगते च मन्युवेगे वह्नेः समीपादाक्षिप्य भ्रात्रा नीता निकटवर्तिनि तरुतले निषसाद।

शनैराचार्यस्तु तथा **हर्ष** इति विज्ञाय विवर्धितादरः सुतरां मुहूर्तमिवातिवाह्य निभृतसंज्ञाज्ञपितेन शिष्येणोपनीतं नलिनीदलैः स्वयमादाय मुखप्रक्षालनायोदकमुपानिन्ये। नरेन्द्रोऽपि सादरं गृहीत्वा प्रथममनवरतरोदनताम्रं रक्तपङ्कजमिव स्वसुश्चक्षुरक्षालयत्पश्चादात्मनः। ततो नरेन्द्रो मन्दमब्रवीत्स्वसारम् – 'वत्से वन्दस्वात्रभवन्तं भदन्तम्। एष ते भर्तुर्हृदयं द्वितीयमस्माकं च गुरुः।' राजवचनात्तु राजदुहितरि पतिपरिचयश्रवणोद्घातेन पुनरानीतनेत्राम्भसि नमन्त्यामाचार्यः प्रयत्नरक्षितागतबाष्पाम्भःसम्भारभज्यमानधैर्यार्द्रलोचनः किंचित्परावृत्तनयनो दीर्घं निशश्वास। स्थित्वा च क्षणमेकं प्रदर्शितप्रश्रयो मृदुवादी मधुरया वाचा व्याजहार – 'कल्याणराशे, अलं रुदित्वातिचिरम्। क्रियतामवश्यकरणीयः स्नानविधिः। स्नात्वा च गम्यतां तामेव भूयो भुवम्।'

अभिभूतो व्याकुलितः सर्वात्मा येन तादृशेन। मुक्तः अप्रतिरुद्धः कण्ठः यस्मिन् कर्मणि यथा तथा। कराभ्यां स्थगितं छन्नं मुखं यस्याः सा। काहलेन महता। मन्युवेगे शोकावेशे। आक्षिप्य अपहृत्य। **शनैरिति**। सुतरां नितान्तं विवर्धितो वृद्धिं प्रापित आदरो मानो येन सः। अतिवाह्य नीत्वा। निभृतया गुप्तया संज्ञया नेत्रादीङ्गितेन आज्ञापितेन आदिष्टेन। द्वितीयं हृदयं हृदयवदतिप्रियः इत्यर्थः। पत्युः भर्तुः परिचयस्य संस्तवस्य श्रवणस्य आकर्णनस्य उद्घात आरम्भस्तेन पुनरानीतं नेत्राम्भो बाष्पवारि यया तस्यां नमन्त्याम्। 'यस्य च भावेन भावलक्षणम्' इति सप्तमी। प्रयत्नेन प्रयासेन रक्षितं पश्चाद् आगतं बाष्पाम्भः तस्य संभारेण ओघेन भज्यमानं धैर्यं मनसो विकारहीनत्वं तेन आर्द्रे अश्रुक्लिन्ने लोचने यस्य सः। अलं रुदित्वा मा रुदिहि 'अलंखल्वोः प्रतिषेधयोः प्राचां

अथ भूपतिरनुवर्तमानो लौकिकमाचारमाचार्यवचनं चोत्थाय स्नात्वा गिरिसरिति सह स्वस्रा तामेव भूमिमयासीत्। तस्यां च सपरिजनां प्रथममाहितावधानः पार्श्ववर्ती परवतीं शुचा प्रतिपिण्डप्रदर्शितप्रयत्नप्रतिपन्नाभ्यवहारकरणां भगिनीमभोजयत्। अनन्तरं च स्वयमाहारस्थितिमकरोत्। भुक्तवांश्च बन्धनात्प्रभृति विस्तरतः स्वसुः **कान्यकुब्जाद्गौड**संभ्रमे गुप्तितो **गुप्त**नाम्ना कुलपुत्रेण निष्कासनम्, निर्गतायाश्च **राज्यवर्धन**मरणश्रवणम्, श्रुत्वा चाहारनिराकरणम्, अनाहारपराहतायाश्च विन्ध्याटवीपर्यटनखेदम्, जातनिर्वेदायाः पावकप्रवेशोपक्रमणं यावत्सर्वमशृणोद्व्यतिकरं परिजनतः। ततः सुखासीनमेकत्र तरुतले विविक्तभुवि भगिनीद्वितीयं दूरस्थितानुजीविजनं राजानमाचार्यः समुपसृत्य शनैरासांचक्रे। स्थित्वा च कंचित्कालांशं लेशतो वक्तुमुपचक्रमे—श्रीमन् आकर्ण्यताम्। आख्येयमस्ति नः किंचित्—

अयं हि यौवनोन्मादात्परिभूय भूयसीर्भार्यास्ताराराजः पुरुहूतपुरोधसो **धिषणस्य** धर्मपत्नीं पत्नीयं**स्तारां** नामापजहार। नाकतश्च पलायांचक्रे। चिराच्च कथंचित्सर्वगीर्वाणवाणीगौरवाद् गिरां पत्युः पुनरपि प्रत्यर्पयामास ताम्। हृदये त्वनिन्धनमदह्यत विरहाद्वरारोहायास्तस्याः सततम्।

एकदा शैलादुदयादुदयमानो विमले वारिणि वरुणालयस्य संक्रान्तमात्मनः प्रतिबिम्बं विलोकितवान्। दृष्ट्वा च तदा सस्मार स्मेरगण्डस्थलस्य

क्त्वा। **अथेति**। अनुवर्तमानोऽनुसरन्। आहितं अवधानं येन स दक्षः। शुचा दुःखेन परवतीं पराधीनाम्। पिण्डे पिण्डे प्रतिपिण्डं प्रतिकवलं 'अव्ययं विभक्ति-' इत्यादिना वीप्सायां अव्ययीभावः। प्रदर्शितः प्रयत्नः प्रयासस्तेन प्रतिपन्नमङ्गीकृतं अभ्यवहारकरणं भोजनं यया ताम्। आहारस्थितिं भोजनम्। गौडस्य संभ्रमे गौडनृपकृते जनविप्लवे। गुप्तितो बन्दिवासात् निःष्कासनं मोचनम्। आहारनिराकरणं उपोषणाङ्गीकरणम्। अनाहारेण पराहतायाः श्रान्तायाः। विविक्ता निर्जना भूः यस्य तस्मिन्। आसांचक्रे निषण्णः। 'दयायासश्च' इति सूत्रेण 'आस'धातोर्लिटि आम् 'आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य' इत्यात्मनेपदम्। लेशतः अल्पशः। **अयं हीति**। ताराराजः चन्द्रः। पुरुहूतस्य इन्द्रस्य पुरोधसः पुरोहितस्य धिषणस्य बृहस्पतेः 'बृहस्पतिः सुराचार्यो गीर्पतिर्धिषणो गुरुः' इत्यमरः। पत्नीं आत्मन इच्छन् पत्नीयन् 'सुप आत्मनः क्यच्' इति क्यचि लटः शत्रादेशः। नाकतः स्वर्गात्। गिरां पत्युः बृहस्पतये शेषे षष्ठी। वरारोहाया नितम्बिन्या विरहात् वियोगात्। **एकदेति**। वरुणालयस्य समुद्रस्य। स्मेरं स्मितयुक्तं गण्डस्थलं कपालौ यस्य तस्य मुखस्य

तारापा मुखस्य । मुमोच च लोचनाभ्यां स्थवीयसो बाष्पबिन्दून् । अथ पततस्तानुदन्वति समस्तानेवाचेमुर्मुक्ताशुक्तयः । तासां च कुक्षिकोशेषु मुक्ताफलीभूतानवाप तान्कथमपि रसातलनिवासी **वासुकिर्नाम** विषमुचामीशः । स च तैर्मुक्ताफलैः पातालतलेऽपि तारागणमिव दर्शयद्भिरेकावलीमकल्पयत् । चकार च **मन्दाकिनी**ति नाम तस्याः । सा च भगवतः सोमस्य सर्वासामोषधीनामधिपतेः प्रभावादत्यन्तविषघ्नी हिमामृतसंभवत्वाच्च स्पर्शेन सर्वसत्त्वसंतापहारिणी बभूव । यतः स तां सर्वदा विषोष्मशान्तये **वासुकिः** पर्यधत्त ।

समतिक्रामति च कियत्यपि काले कदाचित्तामेकावलीं तस्मान्नागराजान्**नागार्जुनो** नाम नागैरेवानीतः पातालतलं भिक्षुरभिक्षत लेभे च । निर्गत्य च रसातलात्त्रिसमुद्राधिपतये **सातवाहन**नाम्ने नरेन्द्राय सुहृदे स ददौ ताम् । सा चास्माकं कालेन शिष्यपरम्परया कथमपि हस्तमुपगता । यद्यपि परिभव इव भवति भवादृशां दत्त्रिम उपचारस्तथाप्योषधिबुद्ध्या सर्वसत्त्वराशिरक्षाप्रवृत्तेन रक्षणीयशरीरेण विषरक्षापेक्षया गृह्यताम् ' इत्यभिधाय भिक्षोरभ्याशवर्तिनश्चीवरपटान्तसंयतां मुमोच तामेकावलीं मन्दाकिनीम् ।'

राजा तु मांसलैस्तस्याः संमुखैर्मयूखैराकुलीक्रियमाणं मुहुर्मुहुरुन्मीलयन्निमीलयंश्च चक्षुः कथमपि प्रयत्नेन ददर्श सर्वाशापूरणीं ताम् । पश्यंश्च विस्मयमाजगाम मनसा सुचिरम् । आचार्यस्तु तामुद्धृत्य बबन्ध बन्धुरे

सस्मार 'अधीगर्थदयेशां कर्मणि ' इति षष्ठी । स्थवीयसः स्थूलतरान् । उदन्वति उदधौ 'उदन्वानुदधौ च' इति निपातः । आचेमुः अपिबन् । कुक्षिकोशेषु पुटेषु । मुक्ताफलीभूतान् मुक्ताफलत्वेन परिणतान् । अभूततद्भावे च्विः । विषमुचां सर्पाणां ईशः वासुकिः । तारागणमिव दर्शयद्भिः तेषां तारकापुञ्जवदुज्ज्वलत्वादिति भावः । एका अद्वितीया आवलिः मुक्ताफलश्रेणिः यस्याः सा 'एकावल्येकयष्टिका' इत्यमरः । विषं हन्तीति 'अमनुष्यकर्तृके च' इति हन्तेष्टक् । 'टिड्ढाणञ्–' इति ङीप् । परिभवः अपमानः । दानेन निर्वृत्तो दत्त्रिमः । उपचारः सन्तोषकरणम् । 'डुदाञ् दाने' इति धातोः 'ड्वितः क्त्रिः' इति क्त्रिः । 'क्त्रेर्मम्नित्यम्' इति मप् । सर्वस्य सत्त्वराशेः प्राणिसमूहस्य रक्षायां रक्षणे प्रवृत्तेन त्वया विषरक्षापेक्षया विषेभ्यः स्वात्मानं रक्षितुम् । चीवरपटस्य मुनिवाससः अन्ते संयतां बद्धाम् । **राजेति** । मांसलैः अत्युज्ज्वलैः । मयूखैः किरणैः आकुलीक्रियमाणं प्रतिहन्यमानशक्तिकम् । सर्वासां आशानां दिशां पक्षे इच्छानां च पूरणीं पूर्यतेऽनेयति ताम् करणे ल्युट् । बन्धुरे सुन्दरे ।

स्कन्धभागे भूपतेः । अथ नरपतिरपि प्रीतिमुपदर्शयन् प्रत्यवादीत् । 'आर्य, रत्नानामीदृशानामनर्हाः प्रायेण पुरुषाः । के च वयमिदानीमात्मनोऽपि किमुत ग्रहणस्य प्रत्याख्यानस्य वा । दर्शनात्प्रभृति प्रभूतगुरुगुणगणहृतेन हृदयेन परवन्तो वयम् । अत्र कामचारो वः कर्तव्यानाम् ' इति ।

समतिक्रान्ते च कियत्यपि काले लब्धविश्रामा **राज्यश्री**स्ताम्बूलवाहिनीं **पत्रलता**माहूयोपांशु किमपि कर्णमूले शनैरादिदेश । दर्शितविनया च **पत्रलता** पार्थिवं व्यज्ञापयत् – देव, देवी विज्ञापयति न स्मराम्यार्यस्य पुरः कदाचिदुच्चैर्वचनमपि । कुतो विज्ञापनम् । इयं हि शुचामसह्यता व्याहारयन्ती शिथिलयति विनयम् । अबलानां हि पतिरपत्यं वाऽवलम्बनम् । उभयविकलानां तु प्राणितमशालीनत्वमेव केवलम् । अतः काषायग्रहणाभ्यनुज्ञयाऽनुगृह्यतामयमपुण्यभाजनं जनः इति । जनाधिपस्तु तदाकर्ण्य तूष्णीमेवावातिष्ठत ।

अथाचार्यः सुधीरभ्यधात् – 'आयुष्मति, दूरगतेऽपि शोके नन्विदानीमपेक्षणीय एवायं ज्येष्ठः पितृकल्पो भ्राता भवत्या गुरुः । इतरथा को न मन्येत कल्याणरूपमीदृशं संकल्पमत्रभवत्याः । ' अखिलमनोज्वरप्रशमनकारणं हि भगवती प्रव्रज्या । महाभागस्तु भिनत्ति मनोरथमधुना । यदि भ्रातेति, यदि ज्येष्ठ इति, यदि वत्सल इति, यदि गुणवानिति, यदि राजेति, सर्वथा स्थातव्यमस्य नियोगे' इत्युक्त्वा व्यरंसीत् ।

के च वयमात्मनोऽपि-न प्रभवामः स्वात्मनोऽपीत्यर्थः । कामचारो यथेष्टाचरणम् । **समतिक्रान्त इति** । उपांशु रहसि 'रहश्चोपांशु चालिङ्गे' इत्यमरः । कुतो विज्ञापनम्–यदुच्चैर्भाषणमपि न कृतं कथं प्रार्थना संभवेत् इत्यर्थः । व्याहारयन्ती भाषणे प्रवर्तयन्ती । शिथिलयति शिथिलं करोति ' तत्करोति तदाचष्टे ' इति णिच् । अवलम्बनं आश्रयः । प्राणितं जीवितं भावे क्तः । अशालीनत्वं औद्धत्यम् । काषायग्रहणं रक्तवस्त्राणां परिधानं बौद्धधर्मे प्रव्रज्याग्रहणमित्यर्थः । अवातिष्ठत ' समवप्रविभ्यः स्थः ' इत्यात्मनेपदम् । **अथेति** । दूरगते अतिभूमिं गते । अपेक्षणीयः अनुसर्तव्यः । पितृकल्पः पितुरीषन्न्यूनः ' ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ' । न मन्येत नाद्रियेत । अखिलस्य मनोज्वरस्य मनस्तापस्य प्रशमनं शान्तिः तस्य कारणं हेतुः । प्रव्रज्या संन्यासः । मनोरथं इच्छां भिनत्ति प्रतिकूलयति । यदि भ्रातेति अयं तव बन्धुरिति हेतोः ' इति हेतुप्रकरणप्रकाशादिसमाप्तिषु ' । इत्यमरः । अस्य नियोगे स्थातव्यं अस्याज्ञानुसर्तव्या । **उपरत-**

उपरतवचसि च तस्मिन्निजगाद नरपतिः— 'आर्यमपहाय कोऽन्य एवमभिदध्यात्। प्रणयप्रदानदुर्ललिता दुर्लभमपि मनोरथमतिप्रीतिरभिलषति। धीरस्यापि धाष्टर्यमारोपयति हृदयलघिमलङ्घितमतिवल्लभत्वम्। अतः किंचिदर्थये भदन्तमियं नः स्वसा बाला च बहुदुःखखेदिता च सर्वकार्यावधीरणोपरोधेनापि यावल्लालनीया नित्यम्। अस्माभिश्च भ्रातृवधापकारिरिपुकुलप्रलयकरणोद्यतस्य बाहोर्विधेयैर्भूत्वा सकललोकप्रत्यक्षं प्रतिज्ञा कृता। पूर्वावमाननाभिभवमसहमानैरर्पित आत्मा कोपस्य। अतो नियुङ्क्तां कियन्तमपि कालमात्मानमार्योऽपि कार्ये मदीये। दीयतामतिथये शरीरमिदम्। अद्यप्रभृति यावदयं जनो लघयति प्रतिज्ञाभारमाश्वासयति च तातविनाशदुःखविक्लवाः प्रजाः, तावदिमामत्रभवतः कथाभिर्धर्म्याभिः प्रतिबोध्यमानामिच्छामि। इयं तु ग्रहीष्यति मयैव समं समाप्तकृत्येन काषायाणि। अर्थिजने च किमिव नातिसृजन्ति महान्तः। अतः परं भवन्त एव बहुतरं जानन्ति' इत्युक्त्वा तूष्णींबभूव भूपतिः।

भूयस्तु बभाषे भदन्तः— 'भव्या न द्विरुच्चारयन्ति वाचम्। चेतसा प्रथममेव प्रतिग्राहिता गुणास्तावका कायबलिमिमम्। उपयोगस्तु निरुपयोगस्यास्य लघुनि गुरुणि वा कृत्ये गुणवदायत्तः' इति। अथ तथा तस्मिन्नभिनन्दित-

---

वचसीति। उपरतं समाप्तं वचो भाषणं यस्य तस्मिन्। प्रणयस्य प्रार्थनायाः प्रदानेन सफलीकरणेन दुर्ललिता दुष्टं ललितं यस्याः सा अतिप्रीतिः प्रेमातिशयः। हृदयस्य लघिम्ना लाघवेन लङ्घितमतिक्रान्तम्। अतिवल्लभत्वं प्रियतमत्वम्। धीरस्यापि गभीरप्रकृतावपि शेषे षष्ठी। धाष्टर्यं धृष्टतां आरोपयति गभीरप्रकृतिमपि जनं धृष्टं करोतीत्यर्थः। किंचिद् भदन्तं अर्थये— याच्यर्थत्वात् अर्थयतेः 'दुह्याचपच–' इत्युक्तदिशा द्विकर्मकत्वम्। सर्वकार्याणां अवधीरणा उपेक्षा सा एव उपरोधः प्रतिबन्धः तेनापि। भ्रातुः राज्यवर्धनस्य वधेन अपकारिणः अनिष्टोत्पादकस्य रिपोः शत्रोः कुलस्य प्रलयकरणे निःशेषीकरणे उद्यतस्य सज्जस्य बाहोर्भुजस्य विधेयैर्वशैर्भूत्वा। आर्यः अत्रभवान् दिवाकरवर्मा। आत्मानं नियुङ्क्तां व्यापारयतु, स्वराद्यन्तोपसर्गादिति वक्तव्यात् निपूर्वात् युजेरात्मनेपदम्। इमां राज्यश्रियम्। धर्मादनपेता धर्म्याः 'धर्मपथ्यर्थन्यायादनपेते' इति यत् 'यस्येति च' इत्यकारलोपः। प्रतिबोध्यमानां सान्त्व्यमानाम्। अतिसृजन्ति वितरन्ति। **भूय इति**। भव्याः कल्याणिनो हर्षसदृशाः। गुणाः श्रीहर्षस्य विनयादयः इमं कायबलिं दिवाकरवर्मणः देहोपायनं प्रतिग्राहिताः स्वीकारिताः, प्रतिपूर्वात् गृह्णातेः णिजन्तात्कर्मणि क्तः। निरुपयोगस्य निष्फल-

प्रणये प्रीयमाणः पार्थिवस्तत्र तामुषित्वा विभावरीमुषसि वसनालंकारादिप्रदानपरितोषितं विसर्ज्य **निर्घात**माचार्येण सह स्वसारमादाय प्रयाणकैः कतिपयैरेव कटकमनु**जाह्नवि** निविष्टं प्रत्याजगाम ।

इति हर्षचरितसारे स्वसृप्राप्तिर्नाम पञ्चम उच्छ्वासः ।

समाप्तोऽयं ग्रन्थः ।

स्यास्य मच्छरीरस्य लघुनि गुरुणि वा कृत्ये उपयोगो नियोजनं गुणवति भवति आयत्तः अधीनः । विभावरीं रात्रिम् । जाह्नव्या अनु अनुजाह्नवि 'यस्य चायामः' इत्यव्ययीभावः । कटकं सैन्यम् ।

इति मिरास्युपाह्वेन विष्णुसूनुना वासुदेवेन कृतायां बालमनोरमाख्यायां हर्षचरितसारव्याख्यायां पञ्चम उच्छ्वासः ।

शुभं भवतु ।

हर्षचरितसारस्थसुभाषितानि ।

१ अखिलमनोज्वरप्रशमनकारणं हि भगवती प्रव्रज्या ।
२ अतत्त्वदर्शिन्यो हि भवन्त्यविदग्धानां धियः ।
३ अर्थिजने किमिव नातिसृजन्ति महान्तः ।
४ अनुकम्पाभूमयः प्रकृत्यैव युवतयः किं पुनर्विपदभिभूताः ।
५ अबलानां पतिरपत्यं वाऽवलम्बनम् ।
६ अभिगमनीयाश्च गुणाः सर्वस्य ।
७ अलोहः खलु संयमनपाशः सौजन्यमभिजातानाम् ।
८ औरसदर्शनं हि यौवनं शोकस्य ।
९ कस्य न प्रतीक्ष्यो मुनिभावः ।
१० को हि नाम सहते विरहमपत्यानाम् ।
११ गृहगतैरनुगन्तव्या एव लोकवृत्तयः ।
१२ धीरस्यापि धाष्टर्यमारोपयति हृदयलघिमलङ्घितमतिवल्लभत्वम् ।
१३ न च स्वप्नदृष्टनष्टेष्विव क्षणिकेषु शरीरेषु निबध्नन्ति बन्धुबुद्धिं प्रबुद्धाः ।
१४ पर्यायान्तरितं दास्यमनुतिष्ठन्ति सुहृदः ।
१५ पिशाचानामिव नीचात्मनां चरितानि छिद्रप्रहारीणि भवन्ति ।
१६ प्रजाभिस्तु मन्धुमन्तो राजानो न ज्ञातिभिः ।
१७ प्रथमं राज्याङ्गं दुर्लभाः सद्भृत्याः ।
१८ प्रायशश्च जनस्य जनयति सुहृदपि दृष्टो भृशमाश्वासम् ।
१९ प्रायेण च सत्स्वप्यन्येषु वरगुणेष्वभिजनमेवानुरुध्यन्ते धीमन्तः ।
२० बालविद्याः खलु महतामुपकृतयः ।
२१ भक्तजनानुरोधविधेयानि तु भवन्ति देवतानां मनांसि ।
२२ भव्या न द्विरुच्चारयन्ति वाचम् ।
२३ मैत्री च प्रायः कार्यव्यपेक्षिणी क्षोणीभृताम् ।
२४ यौवनारम्भ एव कन्यकानामिन्धनीभवन्ति पितरः सन्तापानलस्य ।
२५ यं च किल शोकः समभिभवति तं कापुरुषमाचक्षते शास्त्रविदः ।
२६ लोके लोहेभ्यः कठिनतराः खलु स्नेहमया बन्धनपाशाः ।
२७ विधुरयति धीमतोऽपि धियमतिदुर्धरो बान्धवस्नेहः सर्वप्रमाथी ।
२८ सर्वसत्वानुकम्पिनी प्रायः प्रव्रज्या ।
२९ स्त्रियो हि विषयः शुचाम् ।
३० स्थायिनि यशसि शरीरधीर्वीराणाम् ।

NOTES

ON

THE HARSHACHARITASĀRA

CHAPTER I

P. 1. हर्षचरितसार:- हर्षस्य चरितमधिकृत्य कृतं काव्यं हर्षचरितम्। The affix अण् (अ) is generally added to a word to denote a work having the thing signified by that word as its subject matter by अधिकृत्य कृते ग्रन्थे। (P. IV 3, 87). It is dropped in the present case by लुबाख्यायिकाभ्यो बहुलम्। (The affix अण् is diversely dropped after the names of आख्यायिकाs). तस्य सार: (abridgment). उच्छ्वास: (lit-breathing out) a chapter of an आख्यायिका. Bāṇa has a pun on the word in the following verse – उच्छ्वासान्तेऽप्यखिन्नास्ते येषां वक्त्रे सरस्वती। कथमाख्यायिकाकारा न ते वन्द्या: कवीश्वरा: ॥ ह. च. p. 4॥ नमस्तुङ्ग &c. 'A bow to S'ankara, the first pillar in the construction of the city in the form of the three worlds, that appears charming with a (white) chowrie in the form of the moon kissing his lofty head.' S'iva is called the first pillar of the city of the three worlds as he created the worlds and continues to support them. The moon on his head is compared to the chowries that are tied to such pillars for decoration. 'The verse occurs entire in an inscription Ind. Ant. XIII P. 92' (C. T.). सकल...मुखे – 'Like the single big tusk in the capacious mouth of Gaṇapati there is born in a large royal family only one (prince) who making all kings tremble, resembles Pṛithu (who made all mountains shake).' There is a pun (श्लेष) on महीभृत् (1) a king and (2) a mountain. पृथुप्रतिम :– (1) large; (2) resembling पृथु. पृथु was the son of वेन and was made king after the latter was deposed and killed for his misrule. When his subjects besought him to make the earth fertile, he levelled it by casting all mountains aside with his bow. He was the first great king from whom the earth has received its name पृथिवी. सकलमहीभृत्कम्पकृत् may be construed with दन्त also.

P. 2. पुण्यकृतामधिवास: (1) peopled by the pious (with श्रीकण्ठ:) and (2) inhabited by gods (with 'heaven'). वसुधामवतीर्ण:

वासवावास: इव Like the abode of Indra (heaven) descended on the earth. नानारामा...सुभग: pleasant with the sweet scent of beautiful flowers in diverse gardens. ज्वलन्मख...दिगन्त:- all the ten directions in which were brilliant with a thousand blazing sacrificial fires. सुधारस...चन्द्रलोकस्य – Bright with rows of white houses plastered with chunam, it was, as it were, a prototype of the lunar world (where houses are plastered with white nectar). सहस्राक्ष...क्रमान: Wielding his bow which protected all castes, like Indra who handles his rainbow having all colours. There is a श्लेष on सर्ववर्णधरम्. सर्वादिराज...निर्मित: – formed, as it were, of the mass of lustre of all primeval kings (e. g. पृथु, जनक &c.). उदपादि – was born (Aor. 3rd p. sing. of उद् + पद्) हूणहरिणकेसरी – who was a lion to the deer in the form of the Hūṇas. The Hūṇas were nomad tribes inhabiting the steppes of Central Asia. When they moved from their original home, they divided themselves into two bands, one of which marching to the west drove the Goths to the south of the Danube, while the other, called the white Huns, poured into India and, though checked for a time by Skandagupta, brought about the downfall of the Gupta Empire. Led by Tormāṇa and Mihirakula they occupied Malwa for some time. They were finally exterminated by Rājyavardhana, the brother of Harsha. सिन्धुराजज्वर :- a fever to the King of (the country of) the Indus, i. e. troublesome to the king like burning fever. गुर्जरप्रजागर: who always kept the Gurjara king awake, i. e. allowed him no sleep or rest. Note that the गुर्जरs were then in south-west Rājputāna. Yuan Chwang, who travelled in India in the time of Harsha, mentions the Gurjara country as lying 1800 *li* (= 360 miles) to the north of Valabhi. 'It was like Suraṭh (Kathiawad) in its products and the ways of the people. It had a flourishing population in good circumstances, mostly non-Buddhists, only a few believing in Buddhism.' (Warren II 249). Its capital was Pilomolo (modern Bhinmal). गान्धाराधिप...पाकल: – a bilious fever to the scent elephant in the form of the lord of Gāndhāra. गान्धार was the name of the country to the west of Kashmir, the

capital of which was Purushapura or modern Peshawar. When the Chinese pilgrim visited it the royal family was extinct; the towns and villages were desolate and the inhabitants were very few. For गन्धद्विप and कूटपाकल see com. लाटपाटव etc. who robbed the Lāṭas of their skill (in fighting) i. e. subdued them. लाट is Central and Southern Gujarat; cf. अपरमालवपश्चिमेन लाटविषयः। जयमंगल's com. on कामसूत्र. मालवलक्ष्मी &c. – an axe to the creeper in the form of the glory of the Mālavas. मालव is generally identified with Mālwa and corresponds to Mo-la-po of Yuan Chwang. Warren places it, however, a little to the west, just above Kathiawad. 'The people were of a gentle disposition and for the most part, very intelligent, of refined speech and of a liberal education. Mo-la-po in the southwest and Magadha in the northeast were the two countries in India in which learning was prized'. (Warren II 242). प्रतापशील...नामा – who was wellknown by the other name प्रतापशील (valorous by nature). This whole passage is important as describing the extensive conquests of प्रभाकरवर्धन. In the Madhuvan and Bamskherā copperplates also प्रभाकरवर्धन is described as महासेनगुप्तादेव्यामुत्पन्नश्चतुःसमुद्रातिक्रान्तकीर्तिः प्रतापानुरागोपनतान्यराजो वर्णाश्रमव्यवस्थापनप्रवृत्तचक्र एकचक्ररथ इव प्रजानामार्तिहरः परमादित्यभक्तः परमभट्टारकमहाराजाधिराजश्रीप्रभाकरवर्धनः। Note his title परमभट्टारकमहाराजाधिराज while his ancestors are described in the same inscription simply as महाराजs. The other name, प्रतापशील, of प्रभाकरवर्धन occurs on 9 silver coins which bear the legend 'प्रतपशल' (without vowels). They were found in the village Bhitaura in Fyzabad District. See J.R A.S. 1906 p. 843 foll. जन्मान्तरेऽपि &c – Like Pārvatī who, in her previous life, was Satī to S'iva, she was, even in her past life, the chaste wife of (the king) who made all people happy (शंकर). Satī, the youngest daughter of दक्ष was married to S'ankara. Once upon a time दक्ष commenced a big sacrifice but did not invite Satī or her husband to attend it. Though warned by S'ankara, Satī went there only to find herself insulted. She then threw herself into the sacrificial fire and was reborn as Pārvatī. Cf. कुमार° I, 21. अथावमानेन पितुः प्रयुक्ता दक्षस्य कन्या भवपूर्वपत्नी। सती सती योगविसृष्टदेहा तां जन्मने शैलवधूं प्रपेदे ॥

प्राणानां &c. She was the centre of the king's life, love and confidence and the source of his religious merit and happiness, i. e. The king loved her as his very life, confided in her &c.

P. 3 निसर्गत एव &c. Compare the epithet परमादित्यभक्तः given to him in the inscriptions quoted above. दिनकृतः उदये At the rise of the Sun. Note that Bāṇa often changes the natural order of words for the sake of effect. सितदुकूलधारी clad in white silk. धवलकर्पटप्रावृतशिराः his head being wrapped in a white cloth. कुङ्कुम ... मण्डलके – in a circle smeared with saffron paste. पवित्र ... ददौ – worshipped the Sun with a cluster of red lotuses placed in a pure vessel of ruby and reddened with its (morning) rays, as with his own heart devoted to it (the Sun). अनुरक्त – (1) reddened and (2) devoted. प्रत्युषसि at dawn. जप्यम् qualifies मन्त्रम् fit to be muttered. प्राध्वम् adv.-humbly. प्रयतेन मनसा – with a pure mind. cf. 'पवित्रः प्रयतः पूतः' अमर. जञ्जपूकः – one who mutters prayers frequently. यजजपदशां यङः । – (com. एभ्यो यङन्तेभ्य ऊकः स्यात् । यायजूकः, जञ्जपूकः, दन्दशूकः These are formed with ऊक added to the frequentative bases (यङन्त) of the root यज्, जप् and दंश्. The frequentative of जप् is used only in a bad sense. cf. लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम् । P. III, 1, 24 (com. एभ्यो धात्वर्थगर्हायामेव यङ् स्यात् । गर्हितं लुम्पति लोलुप्यते ।) But here the form जञ्जपूक is used in a good sense. आदित्यहृदयं मन्त्रम् – A sacred prayer addressed to the Sun. भक्तजनानुरोध &c. responsive (lit. obedient) to the entreaties of their devotees. यदृच्छया – by chance. सितकर... पृष्ठे – on the terrace of his palace white with plaster spotless like the rays of the moon (सितकर). परिणत...श्यामायाम् when the night was nearly over. आसन्न...तारकेश्वरे – When the moon with its fading lustre was hanging down (on the western horizon), its beauty being robbed off by the approaching dawn. भूषणरवेण &c. – calling out to her attendants as it were, by the tinkling of her ornaments. Fig. उत्प्रेक्षा. उत्कम्पमानाङ्गयष्टिः her slim body trembling (through fear).

P. 4 सर्वस्यामपि...देवीमुखं Scorched in the ears by the cry 'Help !' which he had heard never before in the whole world, much less in the mouth of his own queen. एकपदे एव instantly.

PUBLIC ... 6 - DEC. 1939 ... ALLAHABAD

शिरोभागाच...निशाम्—as if dividing the night with his bright sword which had a glittering edge and which he drew from the head (of his bed) with his right hand trembling with rage. सीमन्तयन् pr. part, from सीमन्तयति which is a denominative from सीमन्तवत्. सीमन्तवतीं करोति सीमन्तयति, the मतुप् affix being dropped as before इष्ठ. सीमन्त is the parting line in the hair of women. The bright flash of the glittering edge of the sword as the king brandished it, divided darkness into two parts and thus provided the night with a सीमन्त. सीम्नः अन्तः सीमन्तः. Note the Sandhi सीम + अन्त. There s पररूपादेश by शकन्ध्वादिषु पररूपं वाच्यम् । सत्वराव...प्रासादो–Shaking the palace with the stamp of his left foot which he planted in haste. निद्रया...आशानाम् reddening the ends of quarters with his eyes that were very much inflamed with sleep and wrath. पाटलयन् pr. part. from the demoninative of पाटल (red) by तत्करोति तदाचष्टे, (वा०) सर्वासु...विक्षिप्तचक्षुः–Casting his glance in all directions. शान्ते... साध्वसे when the alarm, which had made her heart tremble, disappeared. बालातपेनेव ... दिग्भागान् filling the quarters, as it were with morning light. कुण्डलिनौ – wearing earrings. अङ्गदिनौ–wearing armlets. मे विलपन्त्याः – Not heeding my cries. अनादरे षष्ठी. आर्यपुत्रं विक्रोशयन्ती – crying out to my lord. प्रीयमाणेनान्तःकरणेन – with a gladdened heart. मुदोऽवसरे विषीदसि – You are dejected when you ought to rejoice. समृद्धास्ते...आशिषः The blessings of your elders have borne fruit. परिगृहीता – accepted, favoured. नचिरेण सुप्सुपसमास. In तत्पुरुष the form would have been अचिरेण by नलोपो नञः । P. VI, 3, 73. अतिगुण...अवतरिम् – will delight you with the gift of three very noble children. अवतीर्य – Coming down (from the terrace).

P. 5 राज्यवर्धन...गर्भे First of all, Rājyavardhana appeared in her womb. गर्भे...जननी. His mother became pale as if with his fame even while he was in the womb. Fame is conceived by poets to be white. The paleness of the queen which was really due to pregnancy is imagined by the poet as due to the fame of the yet unborn son Rājyavardhana. Fig उत्प्रेक्षा. अङ्गान्यपि ...भूषणानि – She was unable to support even her limbs, far less to put on any ornaments. समादेष्टुमपि...कर्तुम् She could not even

direct household affairs, much less do them herself. यस्मिञ्जाते...प्रजाः at whose birth the subjects being delighted seemed, as it were, 'to live, and move and have their being' in dancing. मासमेकं ... नरपतिः – The king held a great festival for one month which appeared (as short) as a day. Note मासम् accusative denoting duration of time. देव्या...हर्षः – Simultaneously there appeared Harsha in the womb and joy in the heart of Yaśovatī, i.e. She was glad to find herself big with child again. क्रीडायामपि...आज्ञाभंगम् – She would not suffer disobedience even in play. This was due to the imperious nature of the child in her womb. अपि च...बभूव – She entertained a desire to bathe with the mixed waters of the four oceans. This showed that her son would rule over the earth bounded by the four oceans. प्राप्ते ज्येष्ठामूलीये मासि in the month of Jyeshṭha. ज्येष्ठा च मूलं च ज्येष्ठामूले. छ (ईय) is added to this to denote the time when the two constellations are shining. बहुलासु–कृत्तिकासु i.e. when the moon was in conjunction with the Kṛittikas. For this name of the कृत्तिकाs cf – शतपथब्राह्मण II, 1, 2, एकं द्वे त्रीणि चत्वारीति वा अन्यानि नक्षत्राण्यथैता एव भूयिष्ठा यत्कृत्तिकाः। They consist of six (or sêven, according to some) stars. बहुलपक्षद्वादश्यां on the twelfth day in the dark half of the month. Astronomical calculations made on the basis of these data show that the birth probably took place on the 12th of Jyeshṭha Vadya S'aka 512, (Sunday 4th June 590 A.D.). See M. H. I. Vol. I pp. 42-3. समारुरुक्षति क्षपायौवने – when the night was entering on her youth (i. e. about 10 P. M.). हृदयनिर्विशेषा – Who was dear to her as her own heart. दिष्ट्या... द्वितीयसुतजन्मना – You are to be congratulated on the birth of a second son. पूर्णपात्रम् A vessel full of valuable things (clothes, ornaments &c.) given to one who brings a happy news. See com.

P. 6 राज्ञः परमसंमतः Note the Genitive which shows "who was *then* highly respected by the king मतिबुद्धिपूजार्थेभ्यश्च। P. III, 2, 188. The past passive participle affix (क्त) is added in the sense of the present in the case of roots denoting desiring, knowing and honouring. क्तस्य च वर्तमाने। When क्त is used in the sense of the present, it governs the genitive case of the sub-

ject. सर्वासां...पारदृश्वा who had mastered (lit. seen the other end of) all astronomical treatises. गणकः an astrologer. महितः honoured. हितः a wellwisher. मांधाता a king of the solar race and son of युवनाश्व. युवनाश्व being childless requested some sages to perform a sacrifice for him. They did so and consecrated some water and placed it in a jar on the Vedi. Māndhātā unknowingly drank of it at night and was consequently big with child in course of time. When the son was born and began to cry for milk, the sages said कमेष धास्यति ? Whom will he suck ? Indra replied मां धास्यसि 'He will suck me', whence he got the name of मांधाता. He was the first king to march out for दिग्विजय. व्यतीपातादि० – 'Free from the taint of all evil conjunctions such as malignant aspects of the sun and the moon' C. and T. व्यतीपातः – An evil position of the stars noted in the following – श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तके । यद्यमा रविवारेण व्यतीपातः स उच्यते । वृद्धमनु (cited in the वाचस्पत्यम्) It portends proverty and premature death. सर्वेषूच्च etc. – when all planets were in the ascendant. For the उच्चस्थानs of the several planets see the verse from the बृहज्जातक in the com. 'When रवि and others (i. e. रवि, सोम, भौम, बुध, गुरु, शुक्र, and शनि) are respectively in the राशिs मेष, वृषभ, मकर, कन्या, कर्क, मीन and तुला, they are said to be in the ascendant. About this Mr. C. V. Vaidya remarks as follows – 'Perhaps this (i. e. all the planets being in the ascendant) was an exaggeration of the court astrologer or else when Harsha was born, his future greatness was not known and only when his subsequent greatness entitled him to a good horoscope was one manufactured for him by the court astrologer... Although from the above Bāṇa's testimony regarding the position of the planets is found to be unreliable, his date of birth cannot be so, as Harsha's birthday celebrations must have taken place every year as emperors' birthdays usually are and there could have been no mistake about it. (M. H. I. Vol. I p. 42). ईदृशि लग्ने – When such was the zodiacal sign on the eastern horizon. ततः अर्वाक् – Since then. एवंविधे योगे. At such a conjunction. जन्म भेजे (perf. 3rd p. sing.) was born. अजनि (Aor. 3rd p. sing. of जन्) was born; optionally अजनिष्ट. चक्रवर्ति-

चिह्नानां भाजनम्—The bearer of the signs which foretell universal sovereignty. For **महारत्न** and **सप्तसागर** see com. **सप्ततन्तुः** – a sacrifice. **सप्तसप्तिः** – The Sun. **अत्रान्तरे** – In the meanwhile. **अनाध्माताः** not blown. **विरेसुः** (Perf. 3rd p. pl. of रस् 1 p.) sounded. **तारमधुरम्** (adv.) loudly and sweetly. **अनाहतानि मंगलतूर्याणि रेणुः** Perf. 3rd p. pl. of रण् 1 p.) Unstruck the auspicious musical instruments pealed. **यज्वन्** a sacrificer. **प्रदक्षिण** &c. which presaged the advent of good luck by their mass of flames turning to the right. **प्रजज्वलुः।** (Perf. 3rd p. pl. of ज्वल् 1 P.) blazed up. **अनिन्धना वैतानवह्नयः** Sacrificial fires without any fuel. With the whole passage cf. दिशः प्रसेदुर्मरुतो ववुः सुखाः प्रदक्षिणार्चिर्हविरग्निराददे। बभूव सर्वं शुभशंसि तत्क्षणं भवो हि लोकाभ्युदयाय तादृशाम्। Raghu III, 14. **प्रनृत्तसकलकटकलोकः** – in which all people in the capital were dancing.

P. 7 **वृत्ते .....महोत्सवे** When the great festival was over. **उत्तमाङ्ग...सर्षपे** with the mustard seeds placed on his head for warding off evil (रक्षा). **मुग्धस्मितैः...आकर्षति** while he (Harsha) was attracting the hearts of relatives with his artless smiles like flowers drawing swarms of bees. Smiles are here compared to flowers because they are poetically represented as white. **पञ्चषाणि...हर्षे** while Harsha could take five or six steps. पञ्च वा षट् वा। पञ्चन् + षष् + ड (added by बहुव्रीहौ &c. cited in the com. The affix ड (अ) is added to the end of a Bahuvrihi comp. denoting number, except when it ends in बहु or गण). As डच् has an indicatory ड्, the final vowel with the following consonant of षष् is dropped by टेः। (com. डिति परे भस्य टेर्लोपः स्यात्।). So पञ्चषाः five or six. **गर्भेण...राज्यश्रियम्**—bore राज्यश्री in her womb. **दीर्घरक्तनालनेत्राम्** having long and red lotus-stalk-like eyes. **कुसुमसुकुमारावयवाम्**—whose limbs were as delicate as flowers. **अष्टवर्षदेशीयम्** who was about eight years old. **ईषदसमाप्तौ** &c. (com.) The affixes कल्प, देश्य and देशीय are added in the sense of "a little less than." **उद्धूयमान** &c. Having waving curly side-locks and a tuft of hair. **अवनिपते...आसीत्**—The king looked on him as on his two sons i. e. treated all the three alike. **तेन...नितरां रेजतुः** Associated with him who was straightforward or amiable by nature the two princes appeard exceedingly splendid as do the months of **चैत्र** and

and वैशाख when united with the southern breeze. There is a pun on प्रकृतिदक्षिणेन. See com. रेजतुः Pf. 3rd p. dual of राज् 1U. to shine. अपरेणेव...वर्धमानौ – Growing up together with the joy of the people that was as it were another brother of theirs, i. e. People were delighted to see them grow up. This is an instance of सहोक्ति 'सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम्', काव्यप्रकाश X. अवतेरतुः Pf. 3rd p. dual of अव + तृ 1 U. attained. स्थिरोरुस्तम्भौ – endowed with firm pillar-like thighs. प्रकोष्ठः – the forearm. दीर्घभुजार्गलौ – with long bolt-like arms. विकटोरःकवाटौ Having broad chests like panels (of doors). प्रांशुसालाभिरामौ pleasing to the sight like tall Sāla trees. Cf. – युवा युगव्यायतबाहुरंसलः' कपाटवक्षाः परिणद्धकंधरः । वपुःप्रकर्षादजयद्गुरुं रघुस्तथापि नीचैर्विनयाददृश्यत ॥ Raghu III, 34. प्रथमं राज्याङ्गम् &c. – Good servants who are the principal member of the body politic are difficult to secure.

P. 8 उपधाभिः परीक्षितौ – tried with various temptations. उपधा is a test of honesty. For the seven members of the state, see com. शुचि – blameless. विक्रान्त – valiant. अभिरूप – learned. भुजाविव...अव्यतिरिक्तौ inseparable from my person like my arms, i. e. as dear to me as my body. अनयोरुपरि ... भवितव्यम् – You too should not treat them like other servants. प्रतीहारः – a doorkeeper. चतुर्भिरंगै...स्पृशन्तौ – touching the ground with their four limbs (i. e. knees and hands) and head. उचितां भूमिं भेजाते – sat at a distance suitable (to their positions). अनुवर्तनीयौ – should be attended or waited upon. मेदिनी &c. – with their heads bending down on the ground again and again. दोलायमान pr. part. from दोलायते a denominative from दोला (a swing) – swinging to and fro. The affix is क्यङ् by कर्तुः क्यङ् सलोपश्च । (com. उपमानात्कर्तुः सुबन्तादाचारे क्यङ् वा स्यात् सान्तस्य तु कर्तृवाचकस्य लोपो वा स्यात् ।). The affix क्यङ् (य) is optionally added to a word denoting agency, which is a standard of comparison, in the sense of acting like and the final स्, if any, is optionally dropped. (ङ् of क्यङ् shows that the denominative takes Atm. term.) चक्षुर्गोचरात् अनपयान्तौ – Not going beyond the range of their sight. उपचीयमानपरिचया became more and more familiar with i. e. attained greater and greater skill in. परिमितैरेव दिवसैः – in comparatively few days. Note

the use of the Instr. which is used to denote attainment of success after some period अपवर्गे तृतीया । शरा इव लक्ष्यभुवि – like arrows falling on a target. तरुणीभूता has attained youth, come of age. एतदीया...चिन्ता – Anxiety on her account, like her noble qualities, never leaves my heart even for a moment. एतदीया – एतत्+छ added by वृद्धाच्छः । एतत् and other pronouns are regarded as वृद्ध words by त्यदादीनि च । (P. I, 1, 74 एतानि वृद्धसंज्ञानि स्युः।) सन्तापानलस्य इन्धनीभवन्ति become fuel to the fire of mental anguish i.e. are greatly tormented by anxiety.

P. 9 यथा यथा...हृदयम् – "The more that suitors' envoys flock in, the deeper does wretched anxiety retire, as if abashed, into my heart" C. and T., i. e. He feels more and more anxiety at the thought that his daughter will, before long, be parted from him. Anxiety is described as a young woman that runs into the house at the sight of strangers. गृहगतैः – by householders. लोकवृत्तयः – the ways of the world, e.g. giving the daughters in marriage to others. सत्स्वपि...धीमन्तः – Wise men pay great regard to (lit. follow) noble birth alone (of the intended bridegroom), though he may have other estimable (वर) qualities. धरणीधराणां मूर्ध्नि स्थितः – (1) standing at the head of kings; (2) imprinted on the best of mountains. मौखरिवंशः – 'In the eastern portion of Northern India the Maukharis of Kanauj held sway probably as far east as Brahmaputrā...and southwards as far as the Vindhya range' (M. H. I. p 1). अवन्तिवर्मन् – In the Deo Bārnārk Inscription (Corp. Ins. Vol. III, p.217) this king is said to have confirmed a grant to a Sun-temple at the village वारुणिक (modern Deo Bārnārk) about 25 miles from Ārrah the chief town of the Shahābād district of Bengal which show that his sway had extended up to Bengal. ग्रहपतिः...गतः Like the lord of planets (the moon) come down on earth. दुहितृस्नेह etc. – Her heart being distressed with love for her daughter. धात्रीनिर्विशेषाः – no better than nurses. कृपाकृतविशेषः – the difference between the two being due to pity. आर्तितां प्रतिपद्यते – becomes a cause of affliction. विदितार्थावकार्षीत् informed them. दुहितृदानजलम् – The water of betrothal. जातमुदि – delighted. कृतार्थे – Successful in his mission. अविधवामयः – full of

women whose husbands were alive. चारणमयेषु... दिङ्मुखेषु – when the quarters appeared to be crowded with dancers and singers. गण्यमान: इव जनाङ्गुलीभि: – (the marriage day) counted as it were on people's fingers. प्रत्युद्गम्यमान...प्रतिशब्दकैः – Welcomed, as it were, by the resonance of auspicious musical instruments. मौहूर्तिक: – an astrologer. मुहूर्त + ठक् (इक) = मौहूर्तिक:

